Downloaded from https:// www.studiestoday.com

**HIGHER SECONDARY COURSE**
SECOND LANGUAGE
CLASS XII

# संस्कृतम्

**SANSKRIT**

**उच्चतरमाध्यमिकपाठ्यक्रमः**
द्वितीयभाषा
कक्ष्या १२

Government of Kerala
DEPARTMENT OF EDUCATION

**State Council of Educational Research and Training (SCERT); Kerala**

**2015**

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# राष्ट्रगीतम्

जनगण मन अधिनायक जय हे,
भारत भाग्य विधाता।
पञ्जाब सिन्ध गुजरात मराठा,
द्राविड उत्कल बंगा।
विन्ध्य हिमाचल यमुना गंगा,
उच्छल जलधि तरंगा।
तव शुभ नामे जागे,
तव शुभ आशिष माँगे,
गाहे तव जयगाथा।
जनगण मंगलदायक जय हे,
भारत भाग्य विधाता।
जय हे, जय हे, जय हे,
जय जय जय, जय हे ।

# प्रतिज्ञा

भारतं मम राष्ट्रम्। सर्वे भारतीयाः मे भ्रातरः। अहं मम राष्ट्रे स्निह्यामि। तस्य समृद्धायां नानाविधायां च पूर्विकसम्पत्तौ अभिमानी च भवामि। तद्योग्यतां सम्पादयितुं सदा यतिष्ये च।

अहं पितरौ गुरूंश्चादरिष्ये, बहुमानयिष्ये च। विनयान्वित एवाहं सदा सर्वैः सह व्यवहरिष्ये, सर्वेषु प्राणिषु दयालुर्वर्तिष्ये च।

मम राष्ट्राय राष्ट्रियेभ्यश्चाहं समर्पये स्वसेवाम्। राष्ट्रियाणां योगक्षेमैश्वर्येष्वेवाहम् आत्मनस्तोषं कलयामि।

***Prepared by*** :
**State Council of Educational Research and Training (SCERT)**
Poojappura, Thiruvananthapuram 695012, Kerala

*website* : www.scertkerala.gov.in
*e-mail* : scertkerala@gmail.com
Phone : 0471 - 2341883, Fax : 0471 - 2341869

© Department of Education, Government of Kerala

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# प्रास्ताविकम्।

परिवर्तितपाठ्यपद्धत्यनुसारम् उच्चतरविद्यालयानाम् एकादशवर्गस्य कृते रचितं पाठपुस्तकं २०१४-१५ तमे वर्षे प्रवृत्तिपथमानीतम्। तस्यानुस्यूततया द्वादशवर्गस्य कृते रचितं पाठपुस्तकमिदम्। राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदा निर्दिष्टां पाठ्यपद्धतिमनुसृत्य राज्यस्तरीयं साहचर्यं च परिचिन्त्य एव पाठभागाः निर्द्धारिताः।

एवम् उच्चतरविद्यालये द्वितीयवर्षे उपभाषात्वेन संस्कृतभाषापिपठिषूणां विद्यार्थिनां कृते समाकलितेऽस्मिन् पुस्तके पाठभागः चतुर्भिः एककैः विभक्तः। आर्द्रता, मानविकता, चारुता, निपुणता इति एककानां क्रमशः नाम। काव्यं, कथा, पटकथा, निबन्धः, आख्यायिका, जीवनचरितं, यात्राविवरणम् इत्यादीनि व्यवहाररूपाणि अत्र अन्तर्भवन्ति।

पाठ्यांशानां सम्यगवबोधनार्थम् अवश्यं लघुव्याख्यानमपि अत्र आयोजितम्। पठनोपकारकाणि अभ्यासकार्याणि चान्तर्भावितानि। तानि तु एककानामन्ते दत्तानि। इतोप्यधिकतरम् अभ्यासकार्यम् आयोजयितुम् अध्यापकाः समर्थाः भवेयुः।

राज्यशैक्षिकानुसन्धानप्रशिक्षणपरिषदा समायोजितायां कर्मशालायामेव पुस्तकस्यास्य सङ्कलनं कृतम्, यत्र तत्तद्विषये प्रवीणाः महाविद्यालयीयाध्यापकाः शिक्षशास्त्रज्ञाश्च भागभाजिनः आसन्। पुस्तकस्यास्य उपयोगितासंवर्धनानुगुणं निर्देशादिकम् अध्यापकैः यदि सूच्येत तर्हि भविष्यत्काले तस्योपयोगः क्रियेत। पाठपुस्तकमिदमुद्दिष्टं कार्यं निर्वोढुं प्रभवेदिति प्रतीक्षे।

**डा. एस्. रवीन्द्रन् नायर्**
निदेशकः
राज्यशैक्षिकानुसन्धानप्रक्षिषणपरिषद्
केरलाः

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

## TEXTBOOK DEVELOPMENT COMMITTEE

1. **Dr. MAHESH BABU S. N.,** HSST SANSKRIT, GMHSS NADAVARAMBA,THRISSUR
2. **Dr. T. SUPRABHA,** HSST SANSKRIT, SM HSS CHERAYI, ERANAKULAM
3. **JAYAMOHANA KURUKKAL S.,** HSST SANSKRIT, GHSS MUTTARA, KOLLAM
4. **KRISHNAN O. P.,** HSST SANSKRIT, HSS KUNNAMANGALAM, KOZHIKKODE
5. **LIBI M. B.,** HSST SANSKRIT, SREE SANKARA OHSS LAKKIDI, PALAKAD
6. **NANDAKISHOR R.,** HSST SANSKRIT, AIHSS PADOOR, THRISSUR
7. **N. K. RAMACHANDRAN,** (Rtd.) DEO, WAYANAD
8. **PRAMEELA DEVI S.,** HSST SANSKRIT, GMMGHSS PALAKAD
9. **USHA P. S.,** HSST SANSKRIT, GBHSS MANCHERI, MALAPPURAM
10. **VINAYAN S. K.,** HSST SANSKRIT (Rtd), KANNUR

## EXPERTS

**Dr. P. NARAYANAN NAMBOODIRI**
PROF., SANSKRIT, UNIVERSITY OF CALICUT

**Prof. V. MADHAVAN PILLAI**
ASSOCIATE PROF., SANSKRIT (Rtd), GOVT. WOMEN'S COLLEGE, TVPM.

## GRAPHICS & LAYOUT

**C. B. VINAYAK,** WAYANAD

## ILLUSTRATION &COVER

**PRASAD K.,** THRISSUR

## PHOTOS

**NAVANEETHKISHOR R.,** POONJAR, KOTTAYAM

## ACADEMIC CO-ORDINATOR

**Dr. SHAMEEJA P.,** RESEARCH OFFICER, SANSKRIT, SCERT, TVPM

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# विषयानुक्रमणिका




## आर्द्रता 01

03 तव विरहे...। *गीतम्*

15 व्रज हरितम्। *कथा*

23 भविष्ये तव...। *पटकथा*



## 33 मानविकता

चिन्तारतो बालकः। *महाकाव्यम्* 35

को हेतुः ? *आख्यायिका* 46

दीनदयालुर्भव। *जीवनचरितम्* 52




## चारुता 61

63 कालातिवर्तिनी कला। *साक्षात्कारः*

71 कृष्णशिलासु लास्यम्। *यात्राविवरणम्*

77 सुघटिता भाषा। *निबन्धः*



## 85 निपुणता

निर्ममो योजकः। *नाटकम्* 87

कुशलिनः सन्तु सर्वदा। *इतिहासकाव्यम्* 99

मन एव बलीयत्। *विवरणम्* 107



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

आचार्यात् पादमादत्ते पादं शिष्यस्स्वमेधया।
पादं सब्रह्मचारिभ्यः पादं कालक्रमेण च।।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

तव विरहे | व्रज हरितम् | भविष्ये तव

# आर्द्रता

**क**वीनां विकारविचाराः एव सर्वेष्वपि कालेषु साहित्यकृतीनां विषयीभूता भवन्ति। मनः यदा आर्द्रियते तदा काव्यस्य सम्पत्तिः। रुदितानुसारी खलु कविः। आर्द्रता नाम एकके अष्टपदी, शुककथा, पटकथा च अन्तर्भवति। गीतगोविन्दकर्ता श्रीजयदेवः क्रिस्तोः पश्चात् द्वादशे शतके वंगदेशे जनिमलभत। राधाकृष्णयोः उदात्तप्रेम एव भक्तिप्रस्थाने भक्तिगीतिकाव्यत्वेन परिणतः। विरहातुराणां मनसः आर्द्रता एव प्रकृत्यंशान् स्वीकृत्य मनोहराभिः वर्णनाभिः कविना अत्र चित्रीकृता।

महाभारतस्य अनुशासनपर्वणि वर्ण्यमानायाः शुककथायाः पुनराख्यानं भवति द्वितीयाध्यायत्वेन स्वीकृता शुककथा। अहमेव प्रकृतिः इति उदात्तभावं तथा सहजीविस्नेहं च अत्र प्रमेयः। प्रकृतिमनुष्याणाम् एकभावना आर्द्रचित्ततया साध्या।

दृश्याविष्कारस्य नूतनतमां रीतिं परिचाययितुं पटकथा तृतीयाध्यायत्वेन स्वीकृता। शिथिलीभूतकुटुम्बबन्धानां निदानम् शुष्कीभूता आर्द्रता इति यदा मानवः प्रत्यभिजानाति तदा सः मानविकतां प्राप्नोति।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## मुख्यपठनाधिगमाः

- गीतम् आलपति।
- क्रियाविशेषणानां पट्टिकां करोति।
- आशयमधिकृत्य टिप्पणीं लिखति।
- कथां भावात्मकतया अवतारयति।
- नूतनीम् एकां पटकथां लिखति।
- पटकथानुसारं ह्रस्वचित्रं निर्माति।
- आस्वादनटीकां लिखति।
- प्रकृतिप्राणिनां परस्परपूरकत्वमधिकृत्य चर्चां करोति।

**प्रवेशिका**

*हरितारुणचारुबन्धनः कलपुंस्कोकिलशब्दसूचितः।*
*वद संप्रति कस्य बाणतां नवचूतप्रसवो गमिष्यति॥*

*(कुमारसम्भवम् - ४/१४)*

कविप्रतिपादिताः प्रकृत्यंशाः कान् कान् धर्मान् निर्वहन्ति इति विषये चर्चां कुरुत। (चर्चासूचिका - सहानुभूतिः, परस्परस्नेहः, प्रकृत्यादरः, तादात्म्यभावः।)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



# तव विरहे....!

आवासो विपिनायते प्रियसखीमालापि जालायते
तापोऽपि श्वसितेन दावदहनज्वालाकलापायते।
सापि त्वद्विरहेण हन्त! हरिणीरूपायते हा कथं
कन्दर्पोऽपि यमायते विरचयञ्छार्दूलविक्रीडितम्।।

स्तनविनिहितमपि हारमुदारम्।
सा मनुते कृशतनुरिव भारम्।
राधिका तव विरहे केशव! १



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**सरसमसृणमपि मलयजपङ्कं**
**पश्यति विषमिव वपुषि सशङ्कम्। २।**

**श्वसितपवनमनुपमपरिणाहं**
**मदनदहनमिव वहति सदाहम्। ३।**

**दिशि दिशि किरति सजलकणजालं**
**नयननलिनमिव विगलितनालम्। ४।**

### गीतगोविन्दम्

राधामाधवचरिताख्यानरूपः द्वादशसर्गात्मकः ग्रन्थो भवति गीतगोविन्दम्। वङ्गदेशीयो जयदेवः अस्य ग्रन्थस्य कर्ता। द्वादशशतकस्य प्रारम्भ एवास्य रचनाकालः। भावात्मके अस्मिन् काव्ये राधाकृष्णयोः परस्परानुरागः राधायाः विरहवैवश्यं च वर्ण्यते। आभारतं बहूनां कलारूपाणां साहित्यत्वेन गीतगोविन्दमुपयुज्यते। केरलेषु सोपानसङ्गीतसाहित्यरूपेण प्रचुरप्रचारमाप्तं भवति गीतगोविन्दम्। गीतिकाव्ये श्लोकः तदनन्तरं पदमिति क्रमः। एकैकस्य पदस्य अन्तिमे पादे श्रीजयदेव इति कविमुद्रापि दृश्यते। तालरागानुबन्धगानमेव गीतिकाव्यम्। ग्रन्थे आलपनाय कविना एव रागः तालश्च निर्दिष्टः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**नयनविषयमपि किसलयतल्पं**
**कलयति विहितहुताशनकल्पम्। ५।**

**त्यजति न पाणितलेन कपोलं**
**बालशशिनमिव सायमलोलम्। ६।**

**हरिरिति हरिरिति जपति सकामं**
**विरहविहितमरणेव निकामम्। ७।**

**श्रीजयदेवभणितमिति गीतं**
**सुखयतु केशवपदमुपनीतम्। ८।**

### सोपानसङ्गीतम्

केरलीयसङ्गीतशाखा भवति सोपानसङ्गीतम् । देवतास्तुतिपराणि गीतानि निर्दिष्टरागतालानुसारेण गीयन्ते। इटक्का, चेङ्ङिला च वाद्योपकरणे। देवालयेषु गर्भगृहस्य सोपानसमीपं स्थित्वा एव अवतारयति इत्यस्मात् सोपानसङ्गीतमिति नाम जातम्। कैरल्यां संस्कृते च रचितानि गीतानि गीयन्ते। प्रथमम् अकारेण रागालपनं, तदनु श्लोकः, ततः पदम् इति अवतरणक्रमः। भक्तिरेव भावः। जयदेवस्य गीतगोविन्दं प्राधान्येन अवतारयन्ति। तत्तु अष्टपदी इति प्रथते। षड्कालगोविन्दमारार् इति प्रथितयशः सोपानसङ्गीतज्ञः त्यागराजेन बहुमानितः इति विश्रुतमेव।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## पठनप्रवर्तनानि

१. प्रतिसङ्घं प्रत्येकं वा विविधया रीत्या अष्टपदीं कक्ष्यायाम् आलपतु।

२. अष्टपद्यां वर्णितान् प्रकृत्यंशान् क्रोडीकरोतु पट्टिकायां निवेशयतु च।

३. पाठभागस्थानि क्रियाविशेषणानि सञ्चिनोतु।

४. अधो दत्तानां प्रस्तुतानाम् अप्रस्तुतानि कानि इति पाठभागात् चित्वा प्रदत्ते क्रियापुटे निवेशयतु।

| प्रस्तुतानि | अप्रस्तुतानि |
|---|---|
| आवासः | विपिनम् |
| प्रियसखीमाला | |
| तापः | |
| राधा | |
| कन्दर्पः | |
| मलयजपङ्कं | |
| श्वसितपवनं | |
| किसलयतल्पं | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## व्याख्या

***हरितारुणचारुबन्धन... ।***

**भावार्थः**

कुमारसम्भवे चतुर्थे सर्गे रतिविलापसन्दर्भे अयं श्लोकः अस्ति। कामदहनानन्तरं रतीदेवी प्रकृत्याः एकैकस्मिन् अंशेऽपि कामदेवस्मरणं वितनोति। माकन्दपुष्पं कामबाणेष्वन्यतमं भवति। तत् पुष्पं दृष्ट्वा इतः परं कस्य बाणतां गमिष्यति इति विलपति रती।

**श्लोकः**

***आवासो विपिनायते... ।***

**पदच्छेदः**

| | | |
|---|---|---|
| आवासो विपिनायते | - | आवासः + विपिनायते। |
| प्रियसखीमालापि | - | प्रियसखीमाला + अपि। |
| तापोऽपि | - | तापः + अपि |
| सापि | - | सा + अपि। |
| कन्दर्पोऽपि | - | कन्दर्पः + अपि। |
| विरचयञ्छार्दूलविक्रीडितम् | - | विरचयन् + शार्दूलविक्रीडितम्। |

**गद्यक्रमः**

(हे केशव, तव विरहे) आवासः विपिनायते प्रियसखीमालापि जालायते, तापः अपि श्वसितेन दावदहनज्वालाकलापायते, सा अपि त्वद्विरहेण हरिणीरूपायते, हन्त हा कथं कन्दर्पः अपि शार्दूलविक्रीडितं विरचयन् यमायते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**विस्तरांशः**

आवासः - मन्दिरं, विपिनायते - विपिनम् इव आचरति। विपिनं - वनं। प्रियसखीमाला- प्रियसखीनां माला। माला- पङ्क्तिः। जालायते- जालम् इव आचरति। प्रियसखीनां माला जालायते- इतस्ततः गमनाय रोधकत्वात्। तापः- विरहजनितः तापः, (दुःखं) दावदहनज्वालाकलापायते- दावदहनज्वालायाः, (शिखायाः) यः कलापः (समूहः) दावदहनज्वालाकलापः स इवाचरति। दावाग्निः वायुना प्रचण्डः भवतीति ध्वनिः। दावदहनः अरण्याग्निः (दावोद्भवाग्निः)'दावस्तु दवो वनहुताशनः' इत्यमरः। हरिणीरूपायते- हरिणीरूपमिव आचरति। 'शोणी शोणाथ हरिणी पिशङ्गी पिङ्गला त्वियम्' इत्यमरः।
'कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः' इत्यमरः। शार्दूलविक्रीडितं शार्दूलस्य विक्रीडितम्। 'शार्दूलो व्याघ्री द्वीपी' इत्यमरः। यमायते - यम इव आचरति।

**भावार्थः**

हरिणी प्रदीप्तारण्याग्निपरिवृता अभवत्। तत्रैव सा व्याघ्रेण त्रासिता अग्रे वितते व्याधजाले पतिता च। अतः चकिता सा दशदिशं विलोकमाना रक्षार्थं न कमप्युपायम् अपश्यत्। तद्वत् राधिकापि व्याघ्ररूपेण कामेन त्रासिता सखीरूपजालमध्यगता अरण्याग्निज्वालया इव विरहाग्निना तप्ता (रक्षार्थं कोऽपि मार्गः नास्ति इति भावः) अशरणा सती विललाप।

**पदम् १** ***स्तनविनिहितमपि हारमुदारम्....।***

**पदच्छेदः** कृशतनुरिव - कृशतनुः + इव।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



### नामधातुप्रयोगः

विपिनायते, जालायते, कलापायते, रूपायते, यमायते एतानि पदानि नामधातुरूपाणि। तथा हि विपिनमिव आचरति विपिनायते। कर्त्रर्थात् उपमानात् सुबन्तात् आचारार्थे क्यङ् प्रत्ययं कृत्वा नामधातुं निष्पादयति। क्यङ् प्रत्ययस्य ङित्वात् आत्मनेपदत्वम्। ततः तङादि प्रत्ययान् संयोज्य विपिनायते इत्यादि रूपाणि निष्पाद्यन्ते।

अत्र श्लोके वृत्तनामापि अन्तर्भावितम्। शार्दूलविक्रीडितम् वृत्तम्। तल्लक्षणं तु **'सूर्याश्वैर्मसजस्ततस्सगुरवः शार्दूलविक्रीडितम्।'**

**गद्यक्रमः**

हे केशव तवविरहे सा कृशतनुः राधिका स्तनविनिहितम् उदारं हारम् अपि अतिभारम् मनुते।

**विस्तरांशः**

स्तनविनिहितं - स्तनयोः उपरि सखीजनैः निर्बन्धपूर्वं धारितम्। उदारम् - उत्कृष्टं हारम्। अतिभारमिव (विरहाधिक्यात्) मनुते सङ्कल्पयति।

**भावार्थः**

राधिका सखीभिः धारिता माला अपि विरहतीव्रतया भारयुक्ता इति सङ्कल्पयति।

**पदम् २**

***सरसमसृणमपि मलयजपङ्कं...।***

**गद्यक्रमः**

हे केशव! तव विरहे सा वपुषि सरसमसृणं मलयजपङ्कम् अपि विषम् इव सशङ्कं पश्यति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**विस्तरांशः**

सा- मत्सखी। वपुषि - शरीरे। सरसमसृणं - सरसं च तत् मसृणं च। सरसम् - रसेण जलेन सह। 'मसृणः कर्कशे स्निग्धे' इति मेदिनी। मलयजपङ्कं - मलये जातं मलयजं,

| इकारान्तः स्त्रीलिङ्गः 'प्रकृति' शब्दः | | | |
|---|---|---|---|
| *विभक्तिः* | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
| *प्रथमा* | प्रकृतिः | प्रकृती | प्रकृतयः। |
| *सं प्रथमा* | हे प्रकृते | हे प्रकृती | हे प्रकृतयः। |
| *द्वितीया* | प्रकृतिम् | प्रकृती | प्रकृतीः। |
| *तृतीया* | प्रकृत्या | प्रकृतिभ्याम् | प्रकृतीभिः। |
| *चतुर्थी* | प्रकृत्यै / प्रकृतये | प्रकृतिभ्याम् | प्रकृतिभ्यः। |
| *पञ्चमी* | प्रकृत्याः/ प्रकृतेः | प्रकृतिभ्याम् | प्रकृतिभ्यः। |
| *षष्ठी* | प्रकृत्याः/ प्रकृतेः | प्रकृत्योः | प्रकृतीनाम्। |
| *सप्तमी* | प्रकृत्याम् / प्रकृतौ | प्रकृत्योः | प्रकृतिषु। |

मलयजस्य पङ्कः मलयजपङ्कः तम्। मलयजपङ्कम् - चन्दनलेपः।

*महेन्द्रो मलयस्सह्यः शक्तिमान् ऋक्षवानपि।*
*विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः।।*

'गन्धसारो मलयजो भद्रश्रीश्चन्दनोऽस्त्रियाम्' इत्यमरः। 'पङ्कः कर्दमपापयोः' इति विश्वः। सशङ्कम् - शङ्कया सह वर्तते यस्मिन् कर्मणि तद्यथा (क्रियाविशेषणम्)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**भावार्थः**

शरीरस्य तापनिवारणार्थं लिप्तं स्निग्धं चन्दनं विरहिण्याः तस्याः वपुषि अत्यन्तम् उष्णतायै एव। अतः चन्दनं वा विषं वा लिप्तम् इति उत्प्रेक्ष्यते।

**पदम् ३**

***श्वसितपवनमनुपमपरिणाहं...।***

**गद्यक्रमः**

सा अनुपमपरिणाहं श्वसितपवनं मदनदहनम् इव सदाहं वहति।

**विस्तरांशः**

अनुपमपरिणाहं - अनुपमः परिणाहः यस्य तादृशम्। अनुपमः - अतुल्यः। परिणाहः - व्याप्तिः । 'परिणाहो विशालता' इत्यमरः। श्वसितपवनं - निश्वासवायुम् । मदनदहनम् इव- कामाग्निम् इव। सदाहम् - दाहेन सह वर्तते यस्मिन् कर्मणि तद्यथा (क्रि.वि)। वहति- धारयति।

**भावार्थः**

विरहेण अन्तस्तापो वर्धते, अतः अतिदीर्घं निश्वसिति। स निश्वासः कामाग्निरिव प्रतीयते।

**पदम् ४**

***दिशि दिशि किरति सजलकणजालं...।***

**गद्यक्रमः**

सा राधा सजलकणजालं नयननलिनं, विगलितनालं नलिनम् इव दिशि दिशि किरति।

**विस्तरांशः**

सजलकणजालं - अश्रुजलकणिकासमूहेन युक्तं । नयननलिनम्- नयनमेव नलिनं। विगलितनालम् - विगलितः नालः यस्य तादृशम्। विगलितम् - विक्षिप्तम् (त्रुटितम्)। नालः -



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



मृणालः। दिशि दिशि - सर्वासु दिक्षु। किरति - क्षिपति। अत्र रूपकालङ्कारः।

**भावार्थः** बिसरहितनलिनेन सदृशम् अश्रुपूर्णं परिक्लान्तं च नयनं त्वद्दर्शनाकांक्षया सर्वासु दिक्षु प्रसरति।

**पदम् ५** ***त्यजति न पाणितलेन कपोलं...।***

**गद्यक्रमः** (सा ) अलोलं कपोलम् सायं बालशशिनम् इव पाणितलेन न त्यजति।

**विस्तरांशः** अलोलम्- अचञ्चलम्। बालशशी- बालचन्द्रः। पाणितलेन- करतलेन। अध्यस्ताच्चिबुकं खण्डौ कपोलौ तत्परा हनुः इत्यमरः।

**भावार्थः** अहस्तु यथाकथञ्चित् नीतं त्रियामा(रात्रिः) तु युगायमाना

| दृशिर् प्रेक्षणे धातोः परस्मैपदी लट् | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | **पश्यति** | **पश्यतः** | **पश्यन्ति** |
| मध्यमपुरुषः | **पश्यसि** | **पश्यथः** | **पश्यथ** |
| उत्तमपुरुषः | **पश्यामि** | **पश्यावः** | **पश्यामः।** |

कथं नेतव्या इति कपोलतले पाणिं कृत्वा सायंकाले चिन्तयति। सायं हि विशेषविरहोद्रेको भवति, कपोलस्य हस्तेन आच्छादितत्वात् बालशशिनोपमा, पाण्डुवर्णता तथा।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**पदम् ६**

***नयनविषयमपि किसलयतल्पं... ।***

**अन्वयः-** नयनविषयम् अपि किसलयतल्पं विहितहुताशनकल्पं कलयति ।

**गद्यक्रमः**

**विस्तरांशः**

नयनविषयं - नयनयोः विषयम् । किसलयतल्पम् - पल्लवेन रचितं तल्पम्, नवपल्लवशय्या इत्यर्थः। विहितहुताशनकल्पम् - हुतम् अश्नाति इति हुताशनः (अग्निः) हुताशनस्य कल्पः हुताशनकल्पः, विहितः हुताशनकल्पः, तम्। अग्निसदृशम् इति। कलयति- गणयति। कल गतौ संख्याने च प.प. लट् प्र.पु.ए.व।

**भावार्थः**

पाटलवर्णपल्लवैः रचितं तल्पं केशवस्य विरहात् अग्निना रचितं तल्पमिव गणयति। किसलयेषु ताम्रत्वादि समानधर्मदर्शनात् अग्नित्वसंशयः। उत्प्रेक्षालङ्कारः।

**पदम् ७**

***हरिरिति हरिरिति जपति सकामं... ।***

**पदच्छेदः**

हरिरिति - हरिः + इति।

विरहविहितमरणेव - विरहविहितमरणा + इव।

**गद्यक्रमः**

सा निकामं हरिरिति हरिरिति विरहविहितमरणा इव सकामं जपति।

**विस्तरांशः**

निकामम् - अतिशयेन। विरहविहितमरणा - विरहेण विहितं मरणं यस्याः सा। विरहेण- विश्लेषेण (वियोगेन)। सकामं- साभिलाषं (क्रियाविशेषणं)।

**भावार्थः**

अपरे आसन्नमरणाः विष्णुपदप्राप्त्यर्थं हरिरिति जपति, सा राधा तु अतिशयेन साभिलाषं स्वप्रियस्य कृष्णस्य नाम मुहुर्मुहुः उच्चरति। कामस्य दशस्ववस्थासु अन्तिमां मरणावस्थां



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



प्राप्तुमिच्छया सा हरिः इति कृष्णनाम पुनः पुनः जपति। सा आगामिनि जन्मेऽपि स हरिरेव प्रियतमो भवेदिति आशया जपतीति यावत्। (कामस्य दशावस्थाः - अभिलाषा, चिन्ता, स्मृतिः, गुणकीर्तनम्, उद्वेगः, प्रलापः, उन्मादः, व्याधिः, जडता, मरणम्।)

**पदम् ८** ***श्रीजयदेवभणितमिति गीतं...।***

**गद्यक्रमः** इति श्रीजयदेवभणितं केशवपदम् उपनीतं गीतं सुखयतु।

**विस्तरांशः** भणितं- कथितं। केशवपदं- केशवः पदं यस्य असौ तम्। केशवपदं - विष्णुपदं। उपनीतं- उप समीपं नीतं प्रापितम्। इति -अमुना गीतेन।

**भावार्थः** श्रीजयदेवेन कथितं मोक्षदायकम् इदं गीतं श्रोतॄन् गायकान् च सुखयतु।

## चाक्रिकारोहणप्रक्रिया

विरहतीव्रतायाः विनिमयाय प्रकृतेः अंशाः काव्ये उपयुक्ताः दृश्यन्ते। मनुष्यः प्रकृतिः च अभिन्नौ । एवं चेत् वननशीकरणं, प्रकृतिचूषणं च संभवति वा? युष्माकं अभिप्रायं लिखतु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

[redacted]



# व्रज हरितम्।



"भवन्तः गच्छन्तु, नाहमधुना आगच्छामि। अस्य दयनीयाम् अवस्थां विचिन्त्य कथमेतं त्यक्त्वा गन्तुं शक्नुमः? एषः सर्वदा अस्मान् परित्रातुं व्यग्रः आसीत्। तत्सर्वं विस्मृत्य आपदि एतम् अनादृत्य गन्तुं नाहं समर्था। गच्छन्तु, सर्वे गच्छन्तु।"

सगद्गदं पुनः पुनः विलपन्ती, अन्येषां गमनं सास्रं पश्यन्ती तमेव गाढमाश्लिष्य

"नाहं गच्छामि, नाहं गच्छामि, भवन्तं विहाय नाहं कुत्रापि गच्छामि"। शारिका तूष्णीं भूत्वा तत्रैव उपाविशत्। तस्याः तप्तं मन इव दिशः अरुणिम्ना लिप्ताः। अरुणिमनि एकं दृश्यं मन्दं मन्दं स्मृतिपथमागतम्।

सूर्योदयः।

मातुः पक्षान्तः निद्रासुखमनुभूयमानाः वयं यथाकथञ्चित् सुप्तोत्थिताः। पितरौ भोजनमन्विष्य गतौ। तयोः आगमनकालं यावत् वृक्ष एव पितरौ। स अस्मान् पोतकानिव संरक्षति स्म।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



मम अनुजानां शब्दं श्रुत्वा एव नीडात् बहिरागता। वृक्षस्य अधः तण्डुलान् प्रसृतान् यदृच्छया अपश्यम्। तण्डुलान् आहर्तुम् उद्युक्तायां 'हा हतोऽस्मि!' इति रुदितमश्रौषम्। वृक्षस्य एका शुष्कशाखा कस्यचित् जालधारिणः लुब्धकस्य शिरसि अपतत् इव। अहो ! वृक्षराजः अस्मानरक्षत् इति संचिन्त्य सर्वे समाश्वस्ताः। अस्तामुपगते भास्वति प्रत्यागतौ पितरौ कृतज्ञतापूर्वं वृक्षराजम् अनमताम्। वृक्षस्य आर्द्रता सर्वदा मातुः स्पर्शमिव आश्वासदायिन्यभवत्।

**महाभारतम्**

व्यासप्रणीतः इतिहासग्रन्थः भवति महाभारतम्। महत्तरोऽयं ग्रन्थः पञ्चमवेदत्वेन परिगण्यते। महत्वात् भारवत्वाच्च महाभारतमुच्यते। सपादैकलक्षश्लोकात्मकोऽयं ग्रन्थः अष्टादशपर्वभिः विभक्तम्। कुरूणां पाण्डवानां च चरितं मुख्यतया अत्र प्रतिपाद्यः। अपि च बहूनि उपाख्यानानि तत्र तत्र निबद्धानि। 'यदिहास्ति तदन्यत्र यन्नेहास्ति न तत्क्वचित्' इति व्यासस्य वचनं प्रसिद्धम्।

तस्याः मनोमुकुरः पुनः पुनः घटनाः प्रतिफालयन्नवर्तत।

प्रातः निर्झयाः कलरवं श्रुत्वा, शाखामृगाणां लाङ्गूलान्दोलनं च दृष्ट्वा, शाखायां मन्दं मन्दम् आन्दोलयन्ती अहं व्याधस्य लक्ष्यमभवम्। वृक्षस्य अधः कोटरवासी कश्चन सर्पः व्याधस्य पादयोरन्तरेण झटिति असरत्। विगलितलक्ष्यस्य व्याधस्य शरेण वृक्षः विद्धः। यद्यपि अहं रक्षिता, तथापि विषबाधितः अयं वृक्षः क्रमेण नाशोन्मुखोऽभवत्। एतं वृक्षं त्यक्त्वा मम बान्धवाः पक्षिणश्च सर्वे गताः। किन्तु अहं कुत्रापि न गच्छामि।'

कोऽपि मां स्पृशति........ का एषा?

सा सहसा प्रबुद्धा ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



"वत्से ! "

शारिका पुरतः स्मिताननां काञ्चन तापसीम् अपश्यत्।

"अम्ब! प्रणामः।"

"शारिके ! जानामि सर्वं वृत्तान्तम्। सम्यगाचरितं भवत्या। तव स्नेहस्य,



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**ममतायाः, आर्द्रतायाः च फलं नूनम् प्रप्स्यसि।"**

**सा वात्सल्यपूर्णेन चक्षुषा तां विलोक्य स्मितमुखी अभूत्।**

**तदा शीतलानिलः विचचाल। मेघः अमृतम् अवर्षत्।**

**नचिरेणैव वृक्षः पल्लवितः, पत्रैः शाखाभिः च सम्पुष्टः यथापूर्वं परिणतिं प्राप्तवान्। तत्र एकस्यां शाखायां वृक्षः तां दोलायितुं प्रचक्रमे।**

**'विलसतु हरिताभां लोकभूत्यै नितान्तम्'।**

## पठनप्रवर्तनानि

१. पाठं भावात्मकतया उच्चैः वाचयतु।

२. कथां सम्भाषणरूपेण परिवर्त्य लिखतु।

३. प्रकृतेः महत्वप्रतिपादकानि सुभाषितानि सूक्तीः च सञ्चिनोतु।

| सूक्तीः | सुभाषितानि |
|---|---|
| उदा - वनं नो जीवनं परम् | इमाः आपः शिवाः सन्तु<br>शुभाः सन्तु च निर्मलाः।<br>पावनाः शीतलाः सन्तु<br>पूताः सूर्यस्य रश्मिभिः।। |

५. शारिकायाः वृक्षस्य च मिथः विद्यमानं सौहृदम् अधिकृत्य लघुटिप्पणिम् आरचयतु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## व्याख्या

### विस्तरांशः

भवन्तः - तकारान्तः भवत् शब्दः प्र.ब.व।

गच्छन्तु - गम्लृ गतौ पर. लोट् प्र.पु. ब.व।

आगच्छामि - आ + गम्लृ गतौ पर. लट् उ.पु ए.व।

दयनीयाम् - अतिशयेन दीनाम्। अवस्थां - दशां।

विचिन्त्य - वि + चिति चिन्तायां + ल्यप् (ल्यबन्तम् अव्ययम्)

त्यक्त्वा - ओहाक् त्यागे + क्त्वा (क्त्वान्तम् अव्ययम्)

त्यक्त्वा - उपेक्ष्य। गन्तुम् - गम्लृ + तुमुन्। (तुमुन्नन्तमव्ययम्)

शक्नुमः - शक्लृ शक्तौ पर. लट्. उ.पु. ब.व । शक्ताः भवेम।

सर्वदा - सदा (अव्ययम्)। आचरितुं - अनुष्ठातुम्।

आ + चर् + तुमुन् (तुमुन्नन्तम् अव्ययम्)।

परित्रातुं - रक्षितुं। परि + त्रा + तुमुन् (तुमन्नन्तम् अव्ययम्)।

व्यग्रः - व्यापृतः। विस्मृत्य- विस्मरणं कृत्वा।

वि + स्मृ चिन्तायाम् + ल्यप् (ल्यबन्तम् अव्ययम्)।

आपदि- आपत्काले।

एतम्- अदस् शब्दः द्वितीया ए.व। अनादृत्य - अवगणनं कृत्वा ।

न आदृत्य। आदृत्य - आ + दृर् + ल्यप् (ल्यबन्तम्)।

समर्था - शक्ता। सगद्गदं- गद्गदेन सह वर्तते यस्मिन् कर्मणि।

तद्यथा तथा । पुनः पुनः - मुहुः मुहुः ( अव्ययम्) ।

विलपन्ती- विलापं कुर्वन्ती (विपूर्वक लप् शतृप्रत्ययान्तः)।

विलपन्ती विलपन्त्यौ विलपन्त्यः (स्त्रीलिङ्गे)

सास्रं - अश्रुणा सह वर्तते यस्मिन् कर्णणि तद्यथा तथा। (क्रियाविशेषणम्) सास्रं- बाष्पेण सहितम्।

आश्लिष्य- आलिङ्ग्य। आ + श्लिष् आलिङ्गने +ल्यप् (ल्यबन्तम् अव्ययम्)।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## विस्तरांश:

पश्यन्ती- दृशिर् प्रेक्षणे शतृ (स्त्री)। पश्यन्ती- पश्यन्त्यौ- पश्यन्त्य:। कुत्रापि- कुत्र + अपि (अव्ययम्)। शारिका- शुकी। तत्रैव - तत्र + एव। उपाविशत् - उप + विश् वेशने पर. लङ् प्र.पु.ए.व.।

| ईकारान्तः स्त्रीलिङ्गः 'नदी' शब्दः | | | |
|---|---|---|---|
| ***विभक्तिः*** | ***एकवचनम्*** | ***द्विवचनम्*** | ***बहुवचनम्*** |
| ***प्रथमा*** | शुकी | शुक्यौ | शुक्यः। |
| ***सं प्रथमा*** | हे शुकि | हे शुक्यौ | हे शुक्यः। |
| ***द्वितीया*** | शुकीम् | शुक्यौ | शुकीः। |
| ***तृतीया*** | शुक्या | शुकीभ्याम् | शुकीभिः। |
| ***चतुर्थी*** | शुक्यै | शुकीभ्याम् | शुकीभ्यः। |
| ***पञ्चमी*** | शुक्याः | शुकीभ्याम् | शुकीभ्यः। |
| ***षष्ठी*** | शुक्याः | शुक्योः | शुकीनाम्। |
| ***सप्तमी*** | शुक्याम् | शुक्योः | शुकीषु। |

तप्तं- दुःखितम्। मन इव - मनः + इव।

मनः - 'चित्तं तु चेतो हृदयं हृत् हृदो मानसं मनः' इत्यमरः। अरुणिम्ना - अरुणवर्णेन । लिप्ता - व्यापृता। स्मृतिपथम्- स्मृतेः पन्थाः स्मृतिपथः तम् स्मृतिपथम्- स्मृतौ। पक्षान्तः - पक्षयोः अन्तः ।निद्रा - स्वापः। यथाकथञ्चित् - केनापि प्रकारेण। सुप्तोत्थिताः - निद्रातः प्रबुद्धाः। उत्थिताः - उत् + ष्ठा गतिनिवृत्तौ क्त प्रत्ययान्तः।

पितरौ- माता च पिता च। अन्विष्य- अनु + इष गतौ + ल्यप्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## विस्तरांशः

गतौ - गम्लृ क्तप्रत्ययान्तः। गतः गतौ गताः।

यावत् - पर्यन्तम्। पोतकः -शिशुः।

संरक्षति - सम् + रक्ष रक्षणे पर.लट् प्र.पु.ए.व.।

श्रुत्वा- श्रु श्रवणे क्त्वान्तं। नीडात् - पञ्जरात्।

नीडात् बहिः - बहिः शब्दयोगे पञ्चमी।

तण्डुलः - धान्यविशेषः। प्रसृतान् - व्याप्तान्।

अपश्यम् - दृशिर् पर. लङ्. उ.पु ए व।

आहर्तुं- भोक्तुम्। आ + हृञ् हरणे + तुमुन्।

उद्युक्तायां - कृतश्रमायाम्। हतः - मारितः।

अस्मि- अस् भुवि लट् पर. उ.पु ए व। रुदितं- रोदनम्।

अश्रौषम् - श्रु श्रवणे लुङ् पर. उ.पु.ए.व। लुब्धकः- व्याधः।

वृक्षराजः - वृक्षाणां राजा।

अरक्षत्- रक्ष् पर. लङ् प्रपु .ए व। संचिन्त्य - सम्यक् विचिन्त्य।

अस्तमुपगते भास्वति- यदा भास्वान् अस्तम् उपगतः तदा (सति सप्तमी प्रयोगः)। भास्वान् - सूर्यः।

अनमताम्- णम् प्रह्वते शब्दे च पर.लङ् प्र. पु. द्वि. व.।

अनमत् - अनमताम् - अनमन् ।

आर्द्रता - कारुण्यम्। अधुना - इदानीम्।

तद्दिने - तत् + दिने।

मनः एव मुकुरः मनोमुकुरः। निर्झरी - नदी।

| प्र पूर्वक क्रम् धातोः आत्मनेपदि लिट् | | | |
|---|---|---|---|
| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमपुरुषः | **प्रचक्रमे** | **प्रचक्रमाते** | **प्रचक्रमिरे** |
| मध्यमपुरुषः | **प्रचक्रमिषे** | **प्रचक्रमाथे** | **प्रचक्रमिढ्वे** |
| उत्तमपुरुषः | **प्रचक्रमे** | **प्रचकृवहे** | **प्रचकृमहे।** |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**विस्तरांशः**

कलरवः अव्यक्तमधुरः शब्दः।

लाङ्गूलस्य पुच्छस्य आन्दोलनं लाङ्गूलान्दोलनम्।

असरत् - सृ गतौ पर. लङ्. प्र.पु.ए.व.।

व्याधः- शाकुनिकः। मत्सखीं- मम सखीं।

स्मरामि- स्मृ स्मरणे पर. लट् उ.पु.ए.व।

ममता- स्वीयता।

प्राप्स्यसि- प्र + आप् + पर लृट् म.पु.ए.व.।

नचिरेणैव- नचिरेण + एव। नचिरेण - अचिरेण।

निषेधार्थक नकारेण समासः। नञा समासश्चेत् अचिरेण इति।

प्रचक्रमे- प्र + क्रमु आत्मने लिट् प्र.पु.ए. व.।

पल्लवितः- सञ्जातपल्लवः। कुसुमितः -सञ्जातकुसुमः।

पल्लवितः, कोरकितः, कुसुमितः, तदस्य सञ्जात इति इतच् प्रत्ययः। पल्लवः सञ्जातः अस्य इति विग्रहः।

दोलायितुं- दोलनं कर्तुं। परिणतिः - परिणामम्।

## चाक्रिकारोहणप्रक्रिया

प्रकृतिं प्रति आदरः, अहमेव प्रकृतिः, सहजीविस्नेहः इत्यादिविषयप्रतिपादिकाः सूक्तीः सञ्चिनुत।

यथा -

मातृदेवो भव।

काले वर्षन्तु पर्जन्यः।

इमाः आपः शिवाः सन्तु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# भविष्ये तव...!




दृश्यम् - ८

कथापात्राणि - पुत्रः, स्नुषा, पौत्रः, रोसी (अन्तेवासिनी), अन्या अन्तेवासिनी।

प्रदेशः - सालारात् बहिः।

पटकथा

| रङ्गविवरणम् | संभाषणम् | विनिमयः |
|---|---|---|
| पुत्रः स्नुषा च कार्यालयात् सोपानमार्गेण बहिरागच्छति। पुत्रः अग्रे, पत्नी पृष्ठतः च। पुत्रः चिन्तामग्नः देहलीतः अवरोहति। पत्नी आश्वस्ता इव। कार्यालयस्य देहल्यां स्थाणुमवलब्य उपविशति अपरा वृद्धमाता। सोपानस्य वामतः एका पुरातनी द्रोणी। दक्षिणतः बालकः झटिति पितुः समीपम् आगच्छति। वृद्धायाः दृष्टिः बालके। | | छायाग्राही समीपे। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com





## संस्कृतचलच्चित्रेतिहासः



विश्वचलच्चित्रेतिहासे प्रथमं संस्कृतचलच्चित्रं भवति '**आदिशङ्कराचार्यः**'। श्रीशङ्कराचार्यस्य जीवनस्योपरि संस्कृतभाषायां कृतमिदं चलच्चित्रं १९८३ तमे वर्षे जी. वी. अय्यर् (गणपति वेङ्कटराम अय्यर्) महोदयेन निदेशनं कृतम्। उत्तमचलच्चित्रम्, उत्तमपटकथा, उत्तमछायाग्रहणम्, उत्तमसङ्गीतम् इत्यादिषु देशीयचलच्चित्रपुरस्काराः प्राप्ताः। पटकथा - जी. वी. अय्यर्, निर्माणम् - *नाषणल् फिलिं डवलप्मेन्ट् कोर्परेषन्*, सङ्गीतम् - एम्. बालमुरलीकृष्णा, छायाग्रहणम् - मधु अम्बाट्ट्।

१९९३ तमे वर्षे '**भगवद्गीता**' नाम्ना संस्कृतचलच्चित्रमपि जी. वी. अय्यर् महोदयेनैव निदेशनं कृतम्। तस्मिन् वर्षस्य उत्तमचलच्चित्रपुरस्कारः प्राप्तः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | |
|---|---|---|
| बालकः पितुः दक्षिणहस्तं गृह्णाति। बालकः वदति। | तात ! प्रकोष्ठे तस्मिन् महदुष्णं वर्तते। तत्र व्यजनमेकं स्थाप्यताम्। | छायाग्राही उपरिष्ठात्। |
| पत्नी बालकस्य हस्तम् बलात् गृह्णन्ती अग्रे गच्छति, वदति च। | दिनाभ्यन्तरे मृतिस्तासाम्। किं कृते पुनः... ? | |
| सा बालकमाक्षिप्य कार्यानम् उपसर्पति। पुत्रे कार्यानं प्रविशति रोसी तमाह्वयते। पृष्ठतः स्त्रीशब्दं श्रृणोति। पुत्रः परिवृत्य अवलोकयति। | क्षणं यावत्............। | |
| रोसी आगच्छति। रोसी वदति। | लक्ष्म्यै व्यजनम् अनपेक्षितमेव। ईदृशमुष्णं सोढुं सा समर्था एव। एतस्मादपि असह्यमुष्णं सोढ्वा एव सा भवन्तमपोषयत्। तथापि व्यजनमेकं स्थाप्यतां तत्र। यतः भविष्ये तव पुत्रेण नेष्यमाणस्त्वमिदमुष्णं सोढुमसमर्थः भविष्यसि। | |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | |
|---|---|---|
| रोसी मुखात् उपनेत्रम् अपसार्य पुनः स्थापयति।<br>प्रतिनिवृत्य गच्छति।<br>पुत्रः पत्नी च स्तब्धौ भूत्वा कार्याने आस्ते।<br>अनन्तरं कार्यालयस्य पुरोभागः।<br>पुत्रः कार्याने उपविशति।<br>चिन्तयति।<br>चिन्ताकुले नेत्रे दर्पणे दृश्येते।<br>रोस्याः शब्दं प्रतिध्वनति।<br>खिन्नः पुत्रः उपनेत्रम् अपसार्य करवस्त्रेण मुखं मार्जयति।<br>अन्तःसङ्घर्षम् अनुभूयमानः इव कार्यानस्य नियन्त्रणचक्रं दृढं गृह्णाति। | भविष्ये तव..... | छायाग्राहिणं पुत्रे विपुलीकरोति। |

## पुत्रो रक्षति - संस्कृतह्रस्वचलच्चित्रम्

गानरचना, कथा, पटकथा, सम्भाषणम्, निदेशनम् : निधीष् गोपि
■ निर्माणम् : संस्कृतवैखरी ■ सङ्गीतम् : फ्रान्सिस् आळूर् ■ आलपनम् : विष्णु शिवन् ■ नेपथ्यसङ्गीतम् : जोषि अऱक्कल् ■ कलानिदेशः : विवेक् वी. एस्., गिरीष् सी. आर्. ■ छायाग्रहणम् : विष्णु एम्. वी. ■ मिश्रणम् : निखिल् पूव्वत्तिङ्कल्, वैशाख् ए. ■ सहनिदेशनम् : शरत् मित्रन् ■ निर्माणनियन्त्रणम् : रागेष् एस्. आर्. ■ अभिनेतारः : प्रोफ. डा. वी. के. षैलजा, प्रोफ. डा. सी. एल्. सिसिली, रागेष् एस्. आर्., सजित्त् आलक्काट्, मालिनी सजित्त्, उमा हरिनारायणन्, जिन्स् मोल्, विवेक् वी. एस्, कविता मधु,आदित् कृष्णा, आकाश् कृष्णा। ■



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## पठनप्रवर्तनानि

१. कमप्याशयं स्वीकृत्य पटकथामेकां संरचयतु।
२. 'भविष्ये तव' इति शीर्षकस्य औचित्यं विचिन्त्य मनुष्यबन्धम् अधिकृत्य चर्चां कृत्वा टिप्पणीं लिखतु।

## व्याख्या

### विस्तरांशः

'सालारम्' इति वृद्धसदनस्य नाम। सालारम् शब्दस्य द्रव्यसंरक्षणार्थं भित्तिकीलकं इति पदार्थः। अत्र तात्कालिकमाश्रयमिति भावार्थः।

बहिरागच्छति - बहिः + आगच्छति।

अवरोहति - अव + रुह् प्रादुर्भावे पर. लट् प्र.पु.ए.व.।

अग्रे - पुरोभागे। वामतः - वाममार्गे।

द्रोणी - अवशिष्टस्थापनार्थम् उपयुक्तं पात्रम्।

वर्तते - वृतु वर्तने आत्मने लट् प्र.पु.ए.व.।

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | **वर्तते** | **वर्तेते** | **वर्तन्ते** |
| मध्यमपुरुषः | **वर्तसे** | **वर्तेथे** | **वर्तध्वे** |
| उत्तमपुरुषः | **वर्ते** | **वर्तावहे** | **वर्तामहे** |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## विस्तरांशः

व्यजनं - वीजनयन्त्रम्।
स्थाप्यताम् - ष्ठा आत्म. कर्मणि. लोट् प्र.पु.ए.व.।
मृतिस्तासाम् - मृतिः + तासाम्। मृतिः - मरणं
यानं - वाहनम्।
उपसर्पति - उप + सृप गतौ लट् प्र.पु.ए.व.।
बोधयति - बुध बोधने पर. लट् प्र.पु.ए.व.।
शृणोति - श्रु श्रवणे पर. लट् प्र.पु.ए.व.।

**ऋकारान्तः स्त्रीलिङ्गः 'मातृ' शब्दः**

| *विभक्तिः* | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| *प्रथमा* | माता | मातरौ | मातरः |
| *सं प्रथमा* | हे मातः! | हे मातरौ! | हे मातरः! |
| *द्वितीया* | मातरं | मातरौ | मातॄः |
| *तृतीया* | मात्रा | मातृभ्यां | मातृभिः |
| *चतुर्थी* | मात्रे | मातृभ्यां | मातृभ्यः |
| *पञ्चमी* | मातुः | मातृभ्यां | मातृभ्यः |
| *षष्ठी* | मातुः | मात्रोः | मातॄणाम् |
| *सप्तमी* | मातरि | मात्रोः | मातृषु |

सोढुम् - सहनं कर्तुम्। सह + तुमुन्।
तथापि - तथा + अपि।
नेष्यमाणस्त्वमिदमुष्णं - नेष्यमाणः+ त्वमिदमुष्णम्।
नेष्यमाणः - णीञ् प्रापणे + शानच्।
भविष्यति - भू सत्तायां पर. लृट् प्र.पु.ए.व.।
उपनेत्रं - उपलोचनम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



विस्तरांशः

अपोषयत् - पुष् पुष्टौ पर. लङ् प्र.पु.ए.व.।
आरुह्य - आ + रुह् + ल्यप्।
आस्ते - आस उपवेशने आत्मने. लट्. प्र.पु.ए.व.।
प्रतिध्वनति - प्रति + ध्वन् शब्दे पर लट् प्र.पु.ए.व.।
मार्जयति - मृज् मार्जने णिच् पर लट् प्र.पु.ए.व.।
अन्तःसंघर्षः - मनःसङ्घर्षः।
देहली - द्वाराग्रस्थानम्, द्वारपिण्डी। *वरान्ता* इति भाषायाम्।

## एककानुसारीणि पठनप्रवर्तनानि

१. एककात् संश्लिष्टपदानि चित्वा पट्टिकां करोतु।
२. वार्तापत्रिकायाः प्रकृतिसंरक्षणप्रतिपादिकाः वार्ताः सञ्चित्य सङ्कलितचित्ररूपं (collage) रचयतु।
३. प्रकृतिप्राणिनोः परस्परपूरकत्वम् आश्रित्य चर्चां कृत्वा टिप्पणिं लिखतु।
४. प्रकृतिसंरक्षणस्य आवश्यकतां प्रतिपाद्यमानानि भित्तिपत्राणि रचयतु।
५. पुत्रो रक्षति इति ह्रस्वचित्रं दृष्ट्वा सूचितानुसारं चर्चां कृत्वा आस्वादनटीकां लिखतु।
(दृश्यं, छायाग्राहिणां स्थानं, पात्राणां स्वभावः, सम्भाषणस्य साङ्गत्यं, धारावाहित्वं, विषयविन्यासः)
६. आर्द्रता इति विषये पटकथां विलिख्य एकं ह्रस्वचित्रं निर्मातु।
७. आर्द्रता मानवप्रकृत्योर्मिथः, प्रकृतेः अंशद्वययोः मिथः, मानवयोः मिथश्च कथं प्रवर्तयति इति चर्चां कृत्वा कक्ष्यायाम् अवतारयतु। (निर्दिष्टाभ्यासः)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## आदर्शप्रश्नाः

१. बालशशिनमिव सायमलोलम्। का?

(गोपिका, कृष्णः, कविः)

२. श्रीजयदेवभणितमिति गीतम्। किम्?

(गीतगोविन्दम्, श्रीकृष्णविलासः, क्रिस्तुभागवतम्)

३. भवन्तः गच्छन्तु नाहमधुना आगच्छामि। कस्याः वचनमिदम्?

(शारिकायाः, सर्पस्य, तापस्याः)

४. सालारः इति कस्य नाम?

(गृहस्य, वृद्धसदनस्य, यानस्य)

५. कथासन्दर्भं सम्भाषणरूपेण परिवर्तयतु।

वत्से! उत्थिता शारिका पुरतः स्मिताननां काञ्चन तापसीं दृष्ट्वा अम्ब! प्रणामः। शारिके, जानामि सर्वं वृत्तान्तम्। सम्यगाचरितं भवत्या। तव स्नेहस्य, ममतायाः आर्द्रतायाः च फलं नूनम् अनुभविष्यसि। इति तापस्याः वचनं तां प्रतीक्षानिर्भराम् अकरोत्।

६. पटकथासन्दर्भस्य संक्षिप्तम् आशयं लिखतु।

७. इष्टतमस्य पदस्य आस्वादनटीकां लिखतु।

क. सरसमसृणमपि मलयजपङ्कं
पश्यति विषमिव वपुषि सशङ्कम्।

ख. दिशि दिशि किरति सजलकणजालं
नयननलिनमिव विगलितनालम्।

ग. नयनविषयमपि किसलयतल्पं
कलयति विहितहुताशनकल्पम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




८. कथांशं क्रमीकृत्य कथास्तम्भं रचयतु।

- तापसी वात्सल्यपूर्णेन चक्षुषा तां विलोक्य स्मितमुखी अभूत्।
- विषलिप्तः वृक्षः क्रमेण शुष्कः अभवत्।
- शारिका पुरतः तापसीम् अपश्यत्।
- वृक्षम् अनादृत्य गन्तुं सा न समर्था।
- वृक्षः पल्लवितः पत्रैः शाखाभिः संपुष्टः अभवत्।
- विगलितलक्ष्यस्य व्याधस्य शरेण वृक्षः विद्धः।

## अभिसमीक्षा

- radhikakrishna-jayadeva http://youtu.be/C2cuFOcQdgw
- wikipedia.org/wiki/Ashtapadi
- Ashtapadi Radhika Krishna http://youtu.be/VqAQ35LYAsA





- Mahabharata/Vyasa
- Gita govindam/Jayadeva
- Putro Rakshathi (ShortFilm CD/Samskrutha Vykhari)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते)

| क्रम. सं | पठनप्रवर्तनानि | भागिकतया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
|---|---|---|---|---|
| १ | पाठस्य वाचनमालपनञ्च कृतम्। | | १/२/३/४ | |
| २ | क्रियाविशेषणानि क्रोडीकृतानि। | | १/२/३/४ | |
| ३ | आशयः लिखितः। | | १/२/३/४ | |
| ४ | पटकथा लिखिता। | | १/२/३/४ | |
| ५ | ह्रस्वचित्रं निर्मितम्। | | १/२/३/४ | |
| ६ | आस्वादनटीका रचिता। | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

**क्रोडीकरणप्रक्रिया**

"यत्र विश्वं भवत्येकनीडम्" इत्याशयम् एककेऽस्मिन् कथं समन्वेतुं शक्यते इति चर्चां कुरुत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




चिन्तारतो बालकः | को हेतुः | दीनदयालुर्भव

# मानविकता

मानविकमूल्यान्येव समाजस्य सुस्थितेः प्रगतेश्च आधाराणि भवन्ति। सर्वसमभावना मानविकतारूपेण विवक्ष्यते। अहिंसादिमानविकमूल्यानि स्वजीवने स्वांशीकृतवतां महात्मनां सन्देशाः एकके ऽस्मिन् निबद्धाः। जन्मव्याधिजरामृत्युरूपपरिणामयुक्तस्य शरीरस्य निस्सारतां ज्ञात्वा शारीरिकदुःखापेक्षया आध्यात्मिकदुःखमेव परिहरणीयम् इति ते अवगतवन्तः। आत्यन्तिकदुःखनिवृत्यर्थम् एते महात्मानः भिन्नाः दार्शनिकपद्धतीः आविष्कृतवन्तः।

स्नेह एव ईश्वरः इति तत्वं स्वजीवनेन आविष्कृतवतः श्रीयेशुदेवस्य इतिहासम् आश्रित्य श्रीमता. पी. सी देवस्यामहोदयेन विरचितात् क्रिस्तुभागवतात् उद्धृताः सप्तश्लोकाः एककस्य अस्य प्रथमांशः। "अहिंसा परमो धर्मः" इति उद्घोषयतः गौतमबुद्धस्य चरितमधिकृत्य श्री माटम्प् कुञ्जुक्कुट्टन् महोदयेन कैरळ्यां रचिता आख्यायिका भवति महाप्रस्थानम्। तस्याः संस्कृतानुवादः श्री अशोकन् पुरनाट्टुकरा महोदयेन कृतः। तस्मात् उद्धृतः भवति द्वितीयांशः। तृतीयपाठ्यांशतया "एका जातिः, एको धर्मः, एको देवो मनुष्याणाम्" इति उद्बोधनमन्त्रस्य प्रवक्तुः श्रीनारायणगुरुदेवस्य जीवनात् एका घटना लघुकथारूपेण दत्ता।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## मुख्यपठनाधिगमाः

- श्लोकम् आलपति।
- अन्वयं लिखति।
- श्लोकानाम् आशयं लिखति।
- अव्ययपदान्युपयुज्य वाक्यं रचयति।
- मातृभाषातः संस्कृतभाषां प्रति अनुवदति।
- क्रिस्तुभागवतमधिकृत्य लघु टिप्पणिं लिखति।
- श्रीबुद्धदेवस्य सन्देशान् विशदयति।
- श्रीनारायणगुरोः सन्देशान् विशदीकरोति।

**प्रवेशिका**

पावकं ज्वालय तत्रैव यत्र हि
विद्यते नैका पिपीलिकाऽपि।
सृष्टेः विनाशनं सर्वथा नाचरेत्
स्रष्टा तं पातयेत् नारकाग्नौ।

(प्रवाचकस्य मुहम्मद् नबि महोदयस्य सन्देशमाधारीकृत्य यूसफलि केच्चेरि महोदयविरचितायाः ***उरुम्प्*** इति कैरलीकवितायाः अंशस्य संस्कृतानुवादः)।

**(मानवानां दुःखस्य परिहारार्थं प्रयत्नं कृतवतां दार्शनिकानां जीवितघटनाः कक्ष्यायाम् अवतारयत।)**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



# चिन्तारतो बालकः।



पुरे नासरथे सार्धं कन्यया प्रियया चरन्।
असिधाराव्रतं तक्षा शिशुं दिव्यमपूपुषत्।। १ ।।

आत्मना बलवानेष ज्ञानपूर्णश्च बालकः।
अवर्धत समं पित्रोरद्भुतानन्दशान्तिभिः।। २ ।।

यहूदबालकैरन्यैः क्वापि क्रीडारतस्तथा।
क्वापि चिन्तापरः सर्वैरलक्ष्यत स बालकः।। ३ ।।

मुनिना तेन नीतोऽसौ ताबोरद्रेरधित्यकाम्।
अशेत स्थण्डिले पश्यन् रम्याः प्रकृतिसम्पदः।। ४ ।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**मेषपालैनीर्यमानं मेषयूथं निरीक्ष्य सः।**
**कुमारश्चिन्तयामास भाविशिष्यगणं निजम्।। ५ ।।**

**दृष्ट्वा चिन्तारतं क्षिप्रग्राहिणं बालकं मुनिः।**
**प्रियामाचष्ट तद्वृत्तं सा तु मौनमधारयत्।। ६ ।।**

**यहूदसमुदाचारवर्त्मना तं कुमारकम्।**
**नेतुं वैदिकलेखान्स तक्षकस्तमशिक्षयत्।। ७ ।।**

## क्रिस्तुभागवतम्

केरलीयसंस्कृतकविपरम्परायाम् अन्यतमः भवति पी.सी. देवस्या महोदयः। क्रिस्तुभागवतम् नाम अनेन विरचिते महाकाव्ये येशुदेवस्य जन्मनः प्रभृति क्रूशितमरणपर्यन्तं जीवितवृत्तान्तं सर्वाङ्गीणतया वर्णितम्। अहिंसा, त्यागः, स्नेहः, करुणा, परादरः, सदाचारः इत्यादीनां गुणानां मूर्तिमान् आसीत् येशुदेवः। येशुदेवस्य जीवनचरितमधिकृत्य प्रथमतया रचितं संस्कृतमहाकाव्यम् भवति क्रिस्तुभागवतम्।

## प्रोफ. पी. सी. देवस्या

१९०६ तमे वर्षे केरलेषु कुटमालूर् देशे जनिमलभत। सः मार् इवानियोस् कलालये अध्यापकः आसीत्। तेन प्रसिद्धाः २१ ग्रन्थाः रचिताः। तेषु मुख्यं भवति क्रिस्तुभागवतं नाम संस्कृतमहाकाव्यम्। केन्द्रीयसाहित्य-अकादमीपुरस्कारः केरलसाहित्य-अकादमीपुरस्कारश्च अनेन प्राप्तः।





Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## पठनप्रवर्तनानि

१. श्लोकान् कक्ष्यायाम् आलपतु।

२. क्त्वान्त-ल्यबन्तरूपाणि उपयुज्य वाक्यद्वयं योजयतु।

[redacted]

३. श्लोकानां गद्यक्रमं लिखतु।

४. क्रिस्तुदेवस्य उद्घोषणानि कथं मानवानां जीवने प्रचोदकानि भवन्ति इति विषये चर्चां कृत्वा टिप्पणीं लिखतु। (निर्दिष्टाभ्यासः)

५. ग्रन्थं ग्रन्थकारं च अधिकृत्य लघुटिप्पणिं लिखतु।

६. *चिन्तारतो बालकः* इति शीर्षकस्य औचित्यम् अधिकृत्य चर्चां कृत्वा लधुटिप्पणिं लिखतु। (सूचना- तक्षकस्य विश्वासः - कवेः प्रतिभा)

७. पठितपूर्वस्य अनुष्टुप्-वृत्तस्य लक्षणं पाठभागे घटते वा इति विवेचयतु। ( चाक्रिकप्रवर्तनं - निर्दिष्टाभ्यासः )



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## व्याख्या

**श्लोकः १** *पुरे नासरथे सार्धं...।*

**गद्यक्रमः**

| अन्वयः | | अर्थः |
|---|---|---|
| नासरथे | - | नसरेथ् नामके |
| पुरे | - | नगरे |
| प्रियया | - | भार्यया |
| कन्यया | - | कुमार्या (अनूढा स्त्री कन्या) |
| सार्धं | - | सह |
| असिधाराव्रतं | - | तन्नामकं तीव्रं व्रतम् |
| चरन् | - | आचरन् |
| तक्षा | - | शिल्पी, त्वष्टा |
| दिव्यं | - | पावनं, दैविकम् |
| शिशुं | - | बालम् |
| अपूपुषत् | - | पोषयामास। |

**विस्तरांशः**

अपूपुषत् - पुष धारणे लुङ् पर.प्र ए व।

असिधाराव्रतम् - भार्यया सह वसन्नपि ब्रह्मचर्यम्

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | **अपूपुषत्** | **अपूपुषताम्** | **अपूपुषन्** |
| मध्यमपुरुषः | **अपूपुषः** | **अपूपुषतम्** | **अपूपुषत** |
| उत्तमपुरुषः | **अपूपुषम्** | **अपूपुषाव** | **अपूपुषाम** |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



अनुष्ठीयमानं व्रतम्।
कन्यया सार्धं इति कन्याशब्दस्य तृतीया।

**भावार्थः**

तक्षा जोसफ् नसरेथ् नामके नगरे कन्यकया प्रियया सह असिधाराव्रतम् आचरन् पावनं तं शिशुं येशुं पुपोष।

| नकारान्तः पुल्लिङ्गः तक्षन् शब्दः | | | |
|---|---|---|---|
| *विभक्तिः* | एकवचनम् | द्विवचनम् | बहुवचनम् |
| प्रथमा | **तक्षा** | **तक्षाणौ** | **तक्षाणः** |
| सं प्रथमा | **हे तक्षन्** | **हे तक्षाणौ** | **हे तक्षाणः** |
| द्वितीया | **तक्षाणम्** | **तक्षाणौ** | **तक्ष्णः** |
| तृतीया | **तक्ष्णा** | **तक्षभ्याम्** | **तक्षभिः** |
| चतुर्थी | **तक्ष्णे** | **तक्षभ्याम्** | **तक्षभ्यः** |
| पञ्चमी | **तक्ष्णः** | **तक्षभ्याम्** | **तक्षभ्यः** |
| षष्ठी | **तक्ष्णः** | **तक्ष्णोः** | **तक्ष्णाम्** |
| सप्तमी | **तक्ष्णि/तक्षणि** | **तक्ष्णोः** | **तक्षसु।** |

**श्लोकः २**

***आत्मना बलवानेषः...।***

**पदच्छेदः**

ज्ञानपूर्णश्च - ज्ञानपूर्णः + च
पित्रोरद्भुतानन्दशान्तिभिः - पित्रोः + अद्भुतानन्दशान्तिभिः।

**गद्यक्रमः**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| आत्मना | - | स्वयं |
| एष | - | अयं |
| बालकः | - | पोतकः (येशुदेवः) |
| बलवान् | - | शक्तियुक्तः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



ज्ञानपूर्णः च - विद्यासम्पन्नः च
पित्रोः - मातापित्रोः
अद्भुतानन्दशान्तिभिः - अद्भुतेन आनन्देन शान्त्या च
समं - साकम्
अवर्धत - वृद्धिम् उपगतः

**विस्तरांशः** अवर्धत- वृध वृद्धौ आत्मने लङ् प्रपु ए व।

| *पुरुषः* | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| प्रथमपुरुषः | **अवर्धत** | **अवर्धेताम्** | **अवर्धन्त** |
| मध्यमपुरुषः | **अवर्धाथाः** | **अवर्धेथाम्** | **अवर्धध्वम्** |
| उत्तमपुरुषः | **अवर्धे** | **अवर्धावहि** | **अवर्धामहि।** |

**भावार्थः** अयं बालः येशुः शक्तियुक्तः विद्यासम्पन्नः च सन् मातापित्रोः अद्भुतेन आनन्देन शान्त्या च समम् अवर्धत।

**श्लोकः ३** ***यहूदबालकैरन्यैः ... ।***

**पदच्छेदः**

यहूदबालकैरन्यैः -यहूदबालकैः + अन्यैः।
क्वापि - क्व + अपि।
क्रीडारतस्तथा - क्रीडारतः + तथा।
सर्वैरलक्ष्यत - सर्वैः + अलक्ष्यत।

**गद्यक्रमः**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| स बालकः | - | स येशुदेवः |
| क्वापि | - | कुत्रापि |
| अन्यैः | - | परैः |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| | | |
|---|---|---|
| यहूदबालकैः | - | यहूदवंशीयैः बालैः |
| क्रीडारतः | - | क्रीडातत्परः |
| तथा | - | तेन प्रकारेण |
| क्वापि | - | कुत्रापि |
| चिन्तापरः च | - | चिन्तामग्नः च |
| सर्वैः | - | सर्वैः जनैः |
| अलक्ष्यत | - | अदृश्यत। |

## विस्तरांशः

अलक्ष्यत- लक्ष आलोचने धातोः कर्मणि लङ् प्र पु ए व।

स बालकः सर्वैः अलक्ष्यत - कर्मणिप्रयोगः।

तं बालकं सर्वे अलक्षन्त - कर्तरिप्रयोगः।

**अकारान्तः पुल्लिङ्गः 'बाल' शब्दः**

| *विभक्तिः* | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| *प्रथमा* | बालः | बालौ | बालाः। |
| *सं प्रथमा* | हे बाल | हे बालौ | हे बालाः। |
| **द्वितीया** | बालम् | बालौ | बालान्। |
| *तृतीया* | बालेन | बालाभ्याम् | बालैः। |
| *चतुर्थी* | बालाय | बालाभ्याम् | बालेभ्यः। |
| *पञ्चमी* | बालात् | बालाभ्याम् | बालेभ्यः। |
| *षष्ठी* | बालस्य | बालयोः | बालानाम्। |
| *सप्तमी* | बाले | बालयोः | बालेषु। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**भावार्थः** येशुः कुत्रापि यहूदवंशीयैः बालैः साकं क्रीडातत्परः केषुचिदवसरेषु चिन्तामग्नः च भूत्वा बाल्यकालम् अनयत्।

**श्लोकः ४** ***मुनिना तेन नीतोऽसौ...।***

**पदच्छेदः**

नीतोऽसौ - नीतः + असौ।

अद्रेरधित्यकाम् - अद्रेः + अधित्यकाम्।

**गद्यक्रमः**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| तेन | - | शिल्पिना जोसफेन |
| मुनिना | - | ज्ञानिना |
| ताबोरद्रेः | - | ताबोर्नामकस्य पर्वतस्य |
| अधित्यकाम् | - | पर्वतस्य ऊर्ध्वभूमिं |
| नीतः | - | प्रापितः |
| असौ | - | असौ बालयेशुः |
| रम्याः | - | मनोहराः |
| प्रकृतिसम्पदः | - | प्रकृतिविभवाः |
| पश्यन् | - | अवलोकयन् |
| स्थण्डिले | - | तृणास्तरणे |
| अशेत | - | शयितवान् । |

**विस्तरांशः** अशेत - शीङ् स्वप्ने धातोः लङ् आत्मनेपदी

| *पुरुषः* | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| प्रथमपुरुषः | **अशेत** | **अशेयाताम्** | **अशेरत** |
| मध्यमपुरुषः | **अशेथाः** | **अशेयाथाम्** | **अशेध्वम्** |
| उत्तमपुरुषः | **अशेयि** | **अशेवहि** | **अशेमहि।** |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



*उपत्यका अद्रेरासन्नाभूमिः ऊर्ध्वभूमिरधित्यका* इत्यमरः।

**भावार्थः**

ज्ञानी जोसफः येशुदेवं केषुचिदवसरेषु ताबोर् नामकस्य पर्वतस्योर्ध्वभूमिम् अनयत्। तत्र स बालकः मनोहरान् प्रकृतिविभवान् पश्यन् तृणास्तरणे अशेत।

**श्लोकः ५**

***मेषपालैनीर्यमानं... ।***

**पदच्छेदः**

पदच्छेदः मेषपालैर्नीयमानं - मेषपालैः + नीयमानं।
कुमारश्चिन्तयामास - कुमारः + चिन्तयामास।

**गद्यक्रमः**

| अन्वयः | | अर्थः |
|---|---|---|
| मेषपालैः | - | अजपालैः |
| नीयमानं | - | गमनाय प्रेर्यमाणं |
| मेषयूथं | - | अजसमूहं |
| निरीक्ष्य | - | अवलोक्य |
| स कुमारः | - | स येशुदेवः |
| निजं | - | स्वं |
| भाविशिष्यगणं | - | भविष्यकाले भूयमानं शिष्यसमूहम् |
| चिन्तयामास। | - | अचिन्तयत्। |

**विस्तरांशः**

निरीक्ष्य - ल्यबन्तमव्ययम्।
चिन्तयामास - चिति स्मृत्यां लिट् प्र पु ए व।

**भावार्थः**

येशुदेवः अजपालैः नीतम् अजसमूहं निरीक्ष्य भविष्यकाले



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



एवं शिष्याः भवेयुः इति चिन्तितवान्। येशुदेवः अजपालः, अनुचराः अजाश्च इति बैबिल्प्रसिद्धिः।

**श्लोकः ६**

***दृष्ट्वा चिन्तारतं...।***

**गद्यक्रमः**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| क्षिप्रग्राहिणं | - | शीघ्रम् अवगच्छन्तम् |
| बालकं | - | येशुदेवं |
| दृष्ट्वा | - | संपश्य |
| मुनिः | - | जोसफः |
| तद्वृत्तं | - | तत्कार्यं |
| प्रियां | - | भार्यां |
| आचष्ट | - | अवदत् |
| सा तु | - | मरिया तु |
| मौनं | - | तूष्णीं |
| अधारयत् | - | जग्राह। |

**विस्तरांशः**

अधारयत् - धृञ् धारणे धातोः लङि पर.प्र.पु. ए.व.। दृष्ट्वा- क्त्वान्तमव्ययम्। आचष्ट - आ + चक्षिङ् व्यक्तायां वाचि लुङ् आत्मने प्रपु एव। तद्वृत्तं - तस्य वृत्तम्।

**भावार्थः**

चिन्तानिमग्नं शीघ्रग्राहिणं बालकं येशुदेवं पश्यन् पिता जोसफः

| *पुरुषः* | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| प्रथमपुरुषः | **आचष्ट** | **आचक्षाताम्** | **आचक्षत** |
| मध्यमपुरुषः | **आचष्ठाः** | **आचक्षाथाम्** | **आचड्ढ्वम्** |
| उत्तमपुरुषः | **आचक्षि** | **आचक्ष्वहि** | **आचक्ष्महि।** |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



तद्वृत्तान्तं भार्यां कथितवान्। सा तु तूष्णीं स्थित्वा तत् जग्राह।

श्लोकः ७

*यहूदसमुदाचारवर्त्मना... ।*

पदच्छेदः

तक्षकस्तमशिक्षयत् - तक्षकः + तम् अशिक्षयत्।

गद्यक्रमः

| अन्वयः | अर्थः |
|---|---|
| यहूदसमुदाचारवर्त्मना | - यहूदवंशानाम् आचारमार्गेण |
| तं कुमारकं | - तं येशुदेवम् |
| नेतुं | - नयनाय |
| स तक्षकः | - स मुनिः (जोसफ्) |
| वैदिकलेखान् | - यहूदवेदसम्बन्धीन् लेखान् |
| तम् अशिक्षयत् | - तम् शिक्षयामास। |

विस्तरांशः

नेतुम् - तुमुन्नन्तम्। अशिक्षयत्-शिक्ष् विद्योपादाने णिचि लङि पर. प्र.पु.ए.व.।

भावार्थः

तक्षकः जोसफ् महाभागः यहूदवंशानाम् आचारमार्गेण येशुदेवं नेतुं यहूदवेदसंबन्धान् लेखान् तं शिक्षयामास।


## चाक्रिकारोहणप्रक्रिया

**लोकहिताय स्वजीवितं समर्पितवतां दार्शनिकानां नामानि क्रोडीकरोतु।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



# को हेतुः ?

आख्यायिका

आत्मनाथवियोगात् व्रणितात्मा यशोधरा भूतकालस्मृतिषु व्यापृता अभवत्।

"तत्र भवान् छन्देन सहैव जनपदं द्रष्टुं प्रातिष्ठत। सायं प्रत्यागतः उद्यानस्य बिल्ववेदिकायां तूष्णीमुपाविशत्। तन्नेत्रे अर्धनिमीलिते आस्ताम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**किं जातम्? उच्यताम्।"**

**"यशोधरे !**

**अद्याहं लोकमपश्यम्। वार्धक्यं मरणं चापश्यम्। रोगं वेदनां चापश्यम्।"**

**"साधारणम्, अनया यशोधरयापि कियद्वारं दृष्टमस्ति एतत्सर्वम्। बाल्ये सुप्रबुद्धस्य पुत्रीत्वेन सखीभिः सह विचरत्यवसरे।**

**तेन किम्?**

**वार्धक्यं रोगमरणं च साधारणमेव हि। सर्वैरपि दृष्टं च तत्। यद्यपि इतरेषां वेदना न दृष्टा तथापि स्वकीयां वेदनां जानात्येव हि। यद्यपि जरावन्तमन्यं वृद्धं न पश्यति। तथापि स्वकीयस्य एवमेव। नास्ति कोऽपि मृत्युमुक्तः। एतत्सर्वं सर्वत्र सदापि सम्भवत्येव। गात्रस्य वार्धक्यम् अनुभूयते खलु। मृत्योः अपि अवस्था।"**

**"यशोधरे, जीवितस्य वेदनामहमजानम्। केवलं जीवितुं कियान् क्लेशः अनुभूयते।**

### गौतमबुद्धः

कपिलवस्तुनरेशस्य शुद्धोदनस्य मायादेव्याः च सुपुत्रः आसीत् सिद्धार्थः। मानवानां दुःखनिवृत्तये सिद्धार्थः पत्नीं पुत्रं च विहाय गृहात् प्राव्रजत्। सः महत्या तपस्यया एकस्मिन् दिने पारमार्थिकं बोधम् अलभत। ततः प्रभृति सः बुद्धः इति प्रसिद्धोऽभवत्। गौतमबुद्धस्य मार्गः बौद्धधर्मः इति क्रमेण ख्यातः। बौद्धदर्शनस्य परमसिद्धान्तः दुःखस्य मूलम् आशा इत्यस्ति। धर्मोपदेशं कुर्वाणस्य तस्य अशीति वर्षीयं दीर्घजीवनं वैशाखमासस्य पूर्णिमायां समाप्तम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



दिनम्पूर्णे भारं वहन्तः, कठिनं मृदं विदारयन्तः आतपे शिलां धूर्जयन्तः,
कूपात् जलं कर्षयन्तः एवमतिकठिनानि कर्माणि कुर्वन्तः।
तथापि अत्यावश्यकम् अनार्जयन्तः एव भूरिणः।
सुवर्णताल्यां मोदकानि नैवावश्यकानि। किन्तु शुष्के पत्रे क्षुधां शमयितुं
यत्किञ्चिदावश्यकं खलु।
तदपि अलभमानाः।
ततः रोगात् क्लेशमनुभवन्तः। प्रियामृत्योः क्लिन्ननेत्राः।
प्रिये,
एतत्सर्वं मया दृष्टम्। इतः कञ्चित्कालमत्र एकान्ततायां
तूष्णीमुपविशामि।
दृष्टानां हेतुं परिचिन्तयामि।"

### माटम्प् कुञ्जुक्कुट्टन्



माटम्बु गृहे शङ्करन् नम्बूतिरि महोदयस्य पुत्रः शङ्करः एव सुप्रथितः कविः माटम्प् कुञ्जुक्कुट्टन्। कैरल्यां भ्रष्ट्, अश्वत्थामाव्, ओं शान्तिः, महाप्रस्थानम् इत्यादीनाम् आख्यायिकानां कर्ता असौ। १९८० तमे वर्षे केरलसाहित्य-अकादम्या विशिष्टपुरस्कारेण सम्मानितोऽयं महाप्रस्थानम् नाम ग्रन्थः। इदानीं चलच्चित्रमण्डले प्रवर्तमानोऽसौ अभिनयमण्डले अपि स्वकीयप्रतिभया विराजते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## श्री अशोकन् पुरनाट्टुकरा



अध्यापकः, प्रभाषकः, संघाटकः, परिस्थिति-प्रवर्तकः, ग्रन्थकारः, प्रसाधकः च आसीत् श्री अशोकन् पुरनाट्टुकरा। १९५२ दिसम्बर मासे १० तिथौ तृशूर् जिल्लायां पुरनाट्टुकरा ग्रामे कणवल्लीगृहे जनिमलभत। पुरनाट्टुकरा श्रीरामकृष्णगुरुकुल-विद्यामन्दिरे संस्कृताध्यापकः, भारतमुद्रा नाम संस्कृतमासिक्याः प्रसाधकः, विविधानां संस्कृतग्रन्थानां तथा कैरलीग्रन्थानां च रचनाकारः च आसीत्। महाप्रस्थानम्, इन्नलत्ते मषा इत्येतयोः ग्रन्थयोः संस्कृतपरिभाषा च तेन कृता। स महात्मा २०१४ मई ९ तमे दिने दिवं गतः।

## पठनप्रवर्तनानि

१. अनूदितसंस्कृतसाहित्यग्रन्थानां पट्टिकां निर्मातु।
२. पाठभागं लघुनाटकरूपेण कक्ष्यायाम् अवतारयतु।
३. श्रीबुद्धदेवस्य सूक्तीः समाहृत्य प्रभाषणमेकं स्वकक्ष्यायां प्रस्तौतु।
४. गद्यांशस्य आशयं संस्कृतभाषया अनुवदतु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## व्याख्या

**विस्तरांशः**

व्रणितात्मा - पीडितात्मा।

प्रातिष्ठत - प्र + ष्ठा गतिनिवृत्तौ आ.प.लङ् प्र.पु.ए.व.।

बिल्ववेदिका -बिल्ववृक्षयुक्ता वेदिका।

तूष्णीम् - निश्शब्दम्। मृदं - मृत्तिकाम्।

अर्धनिमीलिते - अर्धं निमीलितम् अर्धनिमीलितं ते।

जरा - वार्धक्यलक्षणम्। विदारयन्तः - भेदनं कुर्वन्तः।

आतपे - सूर्यतापे। धूर्जयन्तः - उत्पाटयन्तः।

जलं कर्षयन्तः - कूपात् जलम् उद्वहन्तः।

| *पुरुषः* | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| प्रथमपुरुषः | **अभवत्** | **अभवताम्** | **अभवन्** |
| मध्यमपुरुषः | **अभवः** | **अभवतम्** | **अभवत** |
| उत्तमपुरुषः | **अभवम्** | **अभवाव** | **अभवाम।** |

अनार्जयन्तः - न सम्पादयन्तः। भूरिणः - बहवः।

मोदकानि - मधुरखाद्यानि।

व्यापृताभवत् - व्यापृता + अभवत्। सहैव - सह + एव।

तन्नेत्रे- तत् + नेत्रे। अद्याहं -अद्य + अहम्।

चापश्यम् - च + अपश्यम्। कियद्वारं - कियत् + वारम्।

विचरत्यवसरे - विचरति + अवसरे।

जानात्येव - जानाति + एव। सम्भवत्येव - सम्भवति + एव।

नैवावश्यकानि - न + एव + आवश्यकानि।

द्रष्टुम् - तुमुन्नन्तम् अव्ययम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



विस्तरांशः

अभवत् - भू सत्तायां पर लङ् प्र.पु ए.व।
आस्ताम् - अस् भुवि पर लङ् प्र.पु द्वि.व।
उच्यताम् - ब्रूञ् व्याक्तायां वाचि कर्मणि लट् आत्मने प. प्र.पु ए.व।
अपश्यम् - दृशिर् प्रेक्षणे पर लङ् .उ.पु.ए.व।
अजानम् - ज्ञा अवबोधने पर लङ् उ.पु.ए.व।

**दकारान्तः सर्वनामशब्दः 'तद्' शब्दः (स्त्रियाम्)**

| *विभक्तिः* | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| *प्रथमा* | सा | ते | ताः। |
| *द्वितीया* | ताम् | ते | ताः। |
| *तृतीया* | तया | ताभ्याम् | ताभिः। |
| *चतुर्थी* | तस्यै | ताभ्याम् | ताभ्यः। |
| *पञ्चमी* | तस्याः | ताभ्याम् | ताभ्यः। |
| *षष्ठी* | तस्याः | तयोः | तासाम्। |
| *सप्तमी* | तस्याम् | तयोः | तासु। |

## चाक्रिकारोहणप्रक्रिया


**भारतीयानां दार्शनिकानां वचनानि सञ्चिनोतु।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

[redacted]



# दीनदयालुर्भव...।

जीवनचरितम्

अनन्तपुर्याः अदूरवर्तिनः अरुविप्पुरजनपदस्य प्रान्ते सन्यासिवर्येण नारायणगुरुणा स्थापितः एकः मठः आसीत्। तस्य मठस्य समीपे एकं कदलीवनमवर्तत। एकदा क्षुधार्तः कश्चित् कदलीफलगुञ्जम् एकं मुषित्वा अगच्छत्। तत्रस्थैः अन्तेवासिभिः परिश्रमेण गृहीतोऽयं चोरः आरक्षिजनसमक्षं नीतः। मठस्य धनम् अपहृतमिति ज्ञात्वा न्यायाधीशः एकाधिकं शतं ताडनं तस्य दण्डरूपेण अघोषयत्।

कर्णाकर्णिकया वृत्तान्तममुं विज्ञाय तद्देशवासिनः जनाः आश्रमं समागताः। तदानीम् अनन्तपुरीतः आश्रमम् आगतः श्रीनारायणगुरुदेवः इमां वार्तां निशम्य खिन्नमानसोऽभवत्।

"हा धिक्!

वीतरागभयक्रोधानां यतिवर्याणां मनसि ईदृशी द्वेषभावना वर्तते चेत्, विना विलम्बं समस्तं सन्यासिकुलम् अधर्मे पतिष्यति इति न सन्देहः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



क्षुत्पीडितम् एनं मन्दिराङ्कणे बद्ध्वा ताडनैः दण्डयसि चेत् अयं रोदनसम्मिश्रः वायुः श्वसनयोग्यो न भवेत्, तस्मात् अहं इतः गच्छामि" इत्युक्त्वा अन्यत्र अगच्छत्।

गुरोः अन्यादृशं एनं भावविशेषं विज्ञाय महाकविः कुमारनाशान् महोदयः गुरोरन्तर्गतं न्यायाधिपाय न्यवेदयत्, समर्पितम् उपक्षेपं प्रत्यग्रहीत् च।

स्वामिनः भूतदयालुताम् अवधार्य सः न्यायाधिपः तं चोरकल्पं स्वेच्छया गन्तुम् अनुजज्ञे।

बहिराश्रमं वर्तमानाः केचन शिष्याः महाकविश्च गुरुदेवम् उपेत्य सशोकम् अवदन्।

"गुरुदेव!

मर्षयन्तु भवन्तः अपराधिने चोराय दण्डनमिति सामाजिकीं व्यवस्थाम् अनुसृत्य आवेदनम् अदाम" इति ।

### श्रीनारायणगुरुदेवः

१८५४ तमे वर्षे केरले तिरुवनन्तपुरस्य समीपे चेम्पषन्ती ग्रामे जनिमलभत। शतभिषक् नक्षत्रे भूजातस्य तस्य पितरौ माटनाशान् तथा कुट्टियम्मा च। पिता माटनाशान् कर्षकः तथा संस्कृतपण्डितः च आसीत्। नाणु आशान् इति नाम्ना प्रसिद्धो नारायणमहाभागः सामाजिक - सांस्कृतिक - आध्यात्मिक मेखलासु च अनितरसाधारणप्रतिभां प्रकटितवान्। तेन महाभागेन आत्मोपदेशशतकम्, दर्शनमाला, दैवदशकम् इत्यादीनि विविधानि स्तोत्र-काव्यानि संस्कृतभाषायां तथा कैरल्यां तमिल्भाषायां च रचितानि। अयम् अष्टाविंशत्युत्तरनवदशतमे वर्षे सितम्बर् मासे, तिरुवनन्तपुरम् जिल्लायां वर्कला देशे स्वेन स्थापिते शिवगिरिमठे एव समाधिं प्राप। अरुविप्पुरशिवलिङ्ग प्रतिष्ठातः कण्वङ्कोड् दर्पणप्रतिष्ठापर्यन्तम् आराधनारङ्गे महात्परिवर्तनम् अनेन साधितम्।



Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com



**स्मयमानः गुरुः तान् प्रत्यवदत्।**

**"सोऽयं दरिद्रः एवं वक्तव्यः आसीत्। यदि दिवा आगमिष्यत् चेत् समस्तं कदलीफलगुञ्जम् अदास्यत्। स्नेहपूर्वकैः उपदेशैः असदाचारेषु निमग्नान् जनान् निवर्तयितुं शक्नोति।**

**तेषाम् हृदयेषु परिणतिम् उपानेतुम् उपदेश एव समर्थः, न दण्डः। अद्य प्रभृति वयं दीनदयालुतया सम्पन्नाः भवामः, ईदृशेषु जनेषु स्निह्यमानाः तेषां मनःपरिवर्तनं च कुर्यामः" इति।**



## पठनप्रवर्तनानि

१. पाठभागं भावात्मकतया कक्ष्यायाम् अवतारयतु।
२. समानपदान्युपयुज्य पाठभागस्थां खण्डिकामेकां पुनर्लिखतु।
३. मानविकता विषये श्रीनारायणगुरुदेवस्य दर्शनम् अधिकृत्य चर्चां कृत्वा लघुटिप्पणिं लिखतु।



## व्याख्या

**विस्तरांशः**

अदूरवर्तिनः - समीपस्थस्य। जनपदः - ग्रामः।
सन्यासिवर्येण - यतिश्रेष्ठेन। क्षुधार्तः - बुभुक्षितः।
कदलीफलगुञ्जं - कदलीफलकदम्बम्।
मुषित्वा - मोषणं कृत्वा क्त्वान्तम् अव्ययम्।
आरक्षिजनसमक्षं - रक्षिपुरुषसकाशम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## विस्तरांशः

कर्णाकर्णिकया - श्रवणपरम्परया। खिन्नमानसः - दुःखितः।

निशम्य - श्रुत्वा ल्यबन्तमव्ययम्।

वीतरागभयक्रोधः - आसक्त्यादिदोषान् त्यक्तवान्।

विज्ञाय -अवगम्य ल्यबन्तमव्ययम्।

उपक्षेपम् - निवेदनम्।

अवधार्य - अवगम्य ल्यबन्तमव्ययम्।

चोरकल्पं - चोर इति आरोपितम्।

अनुजज्ञे - अनुमतिं अददात्।

मर्षयन्तु - क्षम्यन्ताम्।अनुसृत्य - अनु+ सृ + ल्यप्।

स्मयमानः - मन्दस्मितः सन्।

निमग्नः - अवगाढः। परिणतिः- परिवर्तनम्।

निवर्तयितुम् - निवारयितुम्, तुमुन्नन्तमव्ययम्।

स्निह्यमानाः - स्नेहवृत्तिं प्रकटयन्तः।

गृहीतोऽयं - गृहीतः + अयम्।

| उकारान्तः पुल्लिङ्गः 'गुरुः' शब्दः | | | |
|---|---|---|---|
| ***विभक्तिः*** | ***एकवचनम्*** | ***द्विवचनम्*** | ***बहुवचनम्*** |
| ***प्रथमा*** | गुरुः | गुरू | गुरवः |
| ***सं प्रथमा*** | हे गुरो | हे गुरू | हे गुरवः |
| ***द्वितीया*** | गुरुम् | गुरू | गुरून् |
| ***तृतीया*** | गुरुणा | गुरुभ्यां | गुरुभिः |
| ***चतुर्थी*** | गुरवे | गुरुभ्यां | गुरुभ्यः |
| ***पञ्चमी*** | गुरोः | गुरुभ्यां | गुरुभ्यः |
| ***षष्ठी*** | गुरोः | गुर्वोः | गुरूणाम् |
| ***सप्तमी*** | गुरौ | गुर्वोः | गुरुषु। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## विस्तरांशः

| | | |
|---|---|---|
| इत्युक्त्वा | - | इति + उक्त्वा। |
| गुरोरन्तर्गतं | - | गुरोः + अन्तर्गतं । |
| आसीत् | - | अस भुवि लङ् पर.प्र.पु.ए.व। |
| अगच्छत् | - | गम्लृ गतौ लङ् पर.प्र.पु.ए.व। |
| अघोषयत् | - | घुषिर् विशब्दने लङ् पर.प्र.पु.ए.व। |
| वर्तते | - | वृतु वर्तने आत्म. लट् प्र.पु.ए.व। |
| दण्डयति | - | दण्ड दण्डनिपातने लट् पर.प्र.पु ए.व.। |
| न्यवेदयत् | - | नि + विद् ज्ञाने लङ् पर.प्र.पु ए.व.। |

### दकारान्तः त्रिषु लिङ्गेषु समानः 'अस्मद्' शब्दः

| *विभक्तिः* | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| ***प्रथमा*** | अहम् | आवाम् | वयम् |
| ***द्वितीया*** | माम् / मा | आवाम् / नौ | अस्मान् / नः |
| ***तृतीया*** | मया | आवाभ्याम् | अस्माभिः |
| ***चतुर्थी*** | मह्यम् / मे | आवाभ्याम् / नौ | अस्मभ्यं / नः |
| ***पञ्चमी*** | मत् | आवाभ्यं | अस्मत् |
| ***षष्ठी*** | मम / मे | आवयोः / नौ | अस्माकम् / नः |
| ***सप्तमी*** | मयि | आवयोः | अस्मासु |

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | **आगमिष्यत्** | **आगमिष्यताम्** | **आगमिष्यन्** |
| मध्यमपुरुषः | **आगमिष्यः** | **आगमिष्यतम्** | **आगमिष्यत** |
| उत्तमपुरुषः | **आगमिष्यम्** | **आगमिष्याव** | **आगमिष्याम** |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | **भवेत्** | **भवेताम्** | **भवेयुः** |
| मध्यमपुरुषः | **भवेः** | **भवेतम्** | **भवेत** |
| उत्तमपुरुषः | **भवेयम्** | **भवेव** | **भवेम।** |

## विस्तरांशः

प्रत्यग्रहीत् - प्रति + ग्रह उपादाने लुङ् पप्र.पु.ए.व।
अनुजज्ञे - अनु ज्ञा ज्ञाने लिट् आत्म. प्र.पु ए.व.।
अवदन् - वद व्यक्तायां वाचि लङ् प.प्र.पु. ब.व.।
अदास्यत् - डुदाञ् दाने लृङ् पर. प्र.पु.ए.व.।
अभवत् - भू सत्तायां लङ् पर.प्र.पु.ए.व ।
भवेत् - भू सत्तायां पर. वि. लि.प्र.पु ए.व.।
आगमिष्यत् - आ + गम्लृ गतौ धातु लृङ् प प्र.पु.ए.व।



## आदर्शप्रश्नाः

१. क्रिस्तुभागवतस्य कर्ता कः? (पी. सी. देवस्या, एन्.गोपालपिल्ला, मुतुकुलं श्रीधरः)
२. कुमारश्चिन्तयामास भाविशिष्यगणं निजम् - कुमारः कः? (येशुदेवः, श्रीबुद्धः, जोसफ्)
३. जीवितस्य वेदनामहमजानम् - कः? ( यशोधरा , श्रीबुद्धः, छन्दः)
४. महाप्रस्थानस्य संस्कृतानुवादः केन कृतः? (माटम्बु कुञ्जिक्कुट्टन्, के.पी.नारायण पिषारटि,अशोकन् पुरनाट्टुकरा)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



५. गुरोरन्तर्गतं न्यायाधिपं न्यवेदयत् - अत्र गुरुः कः? ( कुमारनाशान्, नारायणगुरुः, माडनाशान्)

६. आत्मना बलवानेष ज्ञानपूर्णश्च बालकः।
अवर्धत समं पित्रोरद्भुतानन्दशान्तिभिः।। श्लोकस्य गद्यक्रमं पूरयत।
आत्मना एष ——— बलवान् ——— पित्रोः अत्भुतानन्दशान्तिभिः ——— अवर्धत।

७. बालकं येशुदेवं वीक्ष्य पिता तद्वृत्तान्तं भार्यायै अकथयत् इति आशयप्रतिपादकं श्लोकं चित्वा लिखत।

(क) यहूदबालकैरन्यैः क्वापि क्रीडारसस्तथा।
क्वापि चिन्तापरः सर्वैरलक्ष्यत स बालकः।।

(ख) दृष्ट्वा चिन्तारतं क्षिप्रग्राहिणं बालकं मुनिः।
प्रियामाचष्ट तद्वृत्तं सा तु मौनमधारयत्।।

८. मातृभाषया आङ्गलभाषया वा अनुवदतु -
सायं प्रत्यागतः उद्यानस्य बिल्ववेदिकायां तूष्णीमुपाविशत्। तन्नेत्रे अर्धनिमीलिते आस्ताम्। किं जातम्? उच्यताम्। यशोधरे, अद्याहं लोकमपश्यम्। वार्धक्यं मरणं चापश्यम्। रोगं वेदना चापश्यम्।

९. नारायणगुरुदेवस्य मानवस्नेहं प्रतिफलन्तमेकं जिवितसन्दर्भं सूचनानुसारं लिखतु। (सूचिका - क्षुधार्तः, कदलीगुञ्जम्, मुषित्वा अगच्छत्, आरक्षिभिः गृहीतः, दण्डनम् अघोषयत्, गुरुदेवस्य प्रत्यागमनम्)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




## एककानुसारीणि पठनप्रवर्तनानि

१. महात्मनाम् उद्बोधनानि स्फोरकपत्रे विलिख्य प्रदर्शयतु।
२. महात्मनां जीविते मानविकतायाम् अधिष्ठितान् जीवितसन्दर्भान् उद्धृत्य लिखतु।
३. महात्मनां जीवितसन्दर्भेभ्यः मानवीयांशानां पट्टिकां विलिखतु।
४. आर्द्रतायाः परिस्फूर्तिः मानविकतायाम् इति विषये सङ्गोष्ठिम् एकं चालयतु।
५.ग्रन्थं ग्रन्थकारञ्चाधिकृत्य पाठभागे प्रदत्तानां टिप्पणीनां विवर्तनं मातृभाषायां वितनोतु।

## अभिसमीक्षा



- gurudevacharithram.blogspot.com
- wikipedia.org/wiki/P._C._Devassia
- wikipedia.org/Kristubhagavatam
- www.buddhanet.net/teachings
- www.aboutbuddha.org



- Narayanaguru Swami/ Prof. M.K. Sanu
- Kristubhagavatam
  P. C. Devassia/Jayabharatham Publications,Tvpm
- Mahaprasthanam -Asokan Puranattukara
  Bharathamudra Prakasan, Puranattukara



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते) | | | | |
|---|---|---|---|---|
| क्रम. सं | पठनप्रवर्तनानि | भागिकतया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
| १ | पाठस्य वाचनमालपनञ्च कृतम्। | | १/२/३/४ | |
| २ | गद्यक्रमः लिखितः। | | १/२/३/४ | |
| ३ | अव्ययपदेन वाक्यं रचितम्। | | १/२/३/४ | |
| ४ | संगोष्ठी प्रचलिता। | | १/२/३/४ | |
| ५ | संस्कृतभाषया अनूदिता। | | १/२/३/४ | |
| ६ | टिप्पण्यः लिखिताः। | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

**क्रोडीकरणप्रक्रिया**

"मनुष्याणां मनुष्यत्वं जातिर्गोत्वं गवां यथा" इति दार्शनिकोद्बोधनम् अधिकृत्य चर्चां कुरुत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com







# चारुता

वैविध्यपूर्णे संस्कृतिसम्पन्ने च भारतदेशे जातानां समेषां जीवने दैनिकव्यवहारे च समुद्ग्रथिता भवन्ति अस्माकं कलाः। अस्मिन् आर्यावर्ते पोषिताः मानवाः स्वयमभिव्यञ्जयन्तः निसर्गसिद्धया सौन्दर्यात्मिकया धिया विभिन्नाः पद्धतीः परिनिष्पादितवन्तः।अत्र आत्मप्रकाशनं न केवलं साहित्यकृतिषु अपि च परितः विद्यमानानां सूक्ष्मवस्तूनां समलङ्करणे तथा नूतनतया आविष्करणे च वर्तते। तथा च परितः विद्यमानां प्रकृतिं पुनः पुनः निरीक्ष्य आर्जितां शास्त्रसम्पदं कलाविष्कारेऽपि सन्निवेशितवन्तः। ज्योतिश्शास्त्रे, गणितशास्त्रे चिकित्साशास्त्रे तथा अन्येषु शास्त्रेषु च निष्णातानां भारतीयशास्त्रकाराणां इतिहासः अस्मासु स्वाभिमानं वर्धयति।

एककेऽस्मिन् त्रयः पाठ्यांशाः सन्ति। प्रथमे केरलीयसंस्कृतरूपकाभिनयस्य कूटियाट्टस्य परिचयः दीयते। पद्मश्री पि.के नारायणन् नम्प्यार्महाभागेन सह कृतस्याभिमुखभाषणस्य अंशःपाठ्यांशत्वेनात्र स्वीकृतः। आशामेनोन् महोदयेन विरचितस्य *कृष्णशिलकलुटे लास्यम्* इति कैरलीयात्राविवरणस्य संस्कृतानुवादः द्वितीयांशत्वेन स्वीकृतः। कोणार्कस्य शिल्पकला तथा शास्त्रपैतृकं च वाचामगोचरं भवति इति अस्य प्रतिपाद्यविषयः। भारतीयभाषाविज्ञानं कथं नूतनसाङ्केतिक-विद्यामुपकरोति इति ज्ञातुं तृतीयांशत्वेन सङ्गणकीयभाषाविज्ञानम् इति पाठः च अस्मिन्नेकके योजितः भवति।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## मुख्यपठनाधिगमाः

- संश्लिष्टपदानि विश्लेषयति।
- कूटियाट्टम् अधिकृत्य टिप्पणीं लिखति।
- कोणार्कमन्दिरस्य विशेषतां विशदयति।
- भारतीयशास्त्रपारम्पर्यमधिकृत्य चर्चते।
- सङ्गणकीयभाषाविज्ञाने संस्कृतस्य सम्बन्धं विवृणोति।
- ह्रस्वयात्राविवरणं लिखति।
- प्रश्नवाक्यानि रचयति।

**प्रवेशिका**

सर्वशास्त्रार्थसम्पन्नं
सर्वशिल्पप्रवर्तकम्।
नाट्याख्यं पञ्चमं वेदं
सेतिहासं करोम्यहम्।।

(नाट्यशास्त्रम्)

नाट्यकलायाः प्राधान्यमधिकृत्य चर्चां करोतु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com

# कालातिवर्तिनी कला।

*(सुप्रसिद्धः कूटियाट्टकलाकारः भवति पद्मश्री. पी. के. नारायणन् नम्प्यार् महोदयः। तेन सह संस्कृतछात्रैः आयोजितस्य साक्षात्कारस्य प्रसक्तः भागः)*

**प्रथमा छात्रा :** महात्मन्, अभिवादयामहे वयम्। अपि कुशली। संस्कृतछात्राः स्मः।

**आचार्यः :** स्वस्त्यस्तु। को विशेषः?

**द्वितीयः छात्रः :** जिज्ञासवो वयम् कूटियाट्टमधिकृत्य।

**आचार्यः :** पृच्छन्तु यथेच्छम्।

**तृतीया छात्रा :** सन्ति बह्व्यः कलाः भारतेषु। तथापि युनस्को (UNESCO) इति अन्ताराष्ट्रसभायाः अङ्गीकारः प्रथमं




Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



|  |  |
|---|---|
|  | कूटियाट्टस्य कृते एव लब्धः। तादृशं किं वैशिष्ट्यम् अस्ति अस्य? |
| आचार्यः | समीचीनम्। भाति ममैवम्। यत् अस्याः कलायाः पौराणिकता, अधुनापि दृश्यमाना सजीवता, तथा अस्यां निहिता विज्ञानपरम्परा, सर्वोपरि संस्कृतस्य माहात्म्यं च। |
| प्र. छा. | भारतीयकलासु अस्यामेव संस्कृतमवशिष्यते किल। |
| आचार्यः | न न, कृष्णनाट्टमपि संस्कृतकलारूपमेव। पूर्वं यक्षगानं आङ्गियनाट् इत्यादीनां बहूनां कलारूपाणां संस्कृतमेवासीत् आधारः। अतीतेषु कालेषु सर्वे संस्कृतं त्यक्त्वा प्रादेशिकभाषां स्वीकृतवन्तः। कूटियाट्टे तु संस्कृतरूपकाण्येव अधुनापि अभिनीयन्ते। |

## कूटियाट्टम्

केरलीयसंस्कृतरूपकाभिनयः भवति कूटियाट्टम्। कूत्त् इति नाम्ना अपि अयं प्रथितः। कूत्त् इति द्रविडपदस्य नाट्यमित्यर्थः। भास-शक्तिभद्र-कुलशेखर-नीलकण्ठ- बोधायनादिभिः रचितानि संस्कृतरूपकाणि अस्मिन् अभिनीयन्ते। सात्विक - आंगिक - वाचिक - आहार्य इति चतुर्विधः अभिनयः दृश्यते ।

कूटियाट्टमिति कैरलीपदस्य मिलित्वा अभिनयः इत्यर्थः। अस्मिन् चतुर्विधाभिनयानां मेलनम्, संस्कृत-प्राकृत-कैरलीभाषाणां मेलनं, स्त्रीणां पुरुषाणां च मिलित्वा अभिनयः, वाच्यार्थव्यङ्ग्यार्थयोः मेलनं च दृश्यते इति सर्वथा कूटियाट्टमिति संज्ञा अन्वर्था।

पूर्वरङ्गक्रियाः, सूत्रधारप्रवेशः, कथापात्रप्रवेशः, निर्वहणं, सरूपकावतरणं, भरतवाक्यं, मुटियक्कित्ता इत्येव अभिनयक्रमः। आतोद्यानि तु मिषाव्, इटक्का , कुषित्तालं, शङ्खः, कुरुङ्कुषल् एतानि भवन्ति। संस्कृरूपकाभिनयः तु भारते सर्वत्र आसीत्। किन्तु कालात् सा परम्परा लुप्तप्राया अभवत् । केरलेषु इयं परम्परा अधुनापि प्रवर्त्तते।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**केन्द्रीयसंगीतनाटक - अक्कादमी द्वारा अङ्गीकृतानि अष्ट केन्द्राणि**

● पद्मश्री माणिमाधवचाक्यार् स्मारकगुरुकुलम्, किल्लिक्कुरिश्शिमङ्गलम्, पालक्काट् ● अम्मन्नूर् चाचुचाक्यार् स्मारकगुरुकुलम् इरिङ्ङालक्कुटा, तृश्शूर् ● मार्गी, तिरुवनन्तपुरम् ● पैङ्कुलं रामचाक्यार् स्मारककलापीठम्, पैङ्कुलम् तृश्शूर् ● पोतियिल् गुरुकुलम्, माङ्ङानम्, कोट्टयम् ● नेपथ्य-मूषिक्कुलम् एरणाकुलम् ● कृष्णन् नम्प्यार् मिषाव् कलरी, चात्तक्कुटम्, तृशूर् ● इन्टर् नाषणल् सेन्टर् फोर् कूटियाट्टम् - तृप्पूणित्तुरा।

**द्वि. छा.** केरले विद्यमानस्य रूपकाभिनयस्य कूटियाट्टस्य आस्वादने जनाः उत्सुकाः वा ?

**आचार्यः** अधिकाः न सन्ति । द्विसहस्रवर्षेभ्यः पूर्वम् आरब्धम् इदम् अद्यापि सजीवम् इत्येव अस्य वैशिष्ट्यम्। केरलेषु भारतेषु च न, विदेशेष्वपि संस्कृतनाट्योपयोगः अयं प्रसृतः इत्यपि श्रद्धेयमेव।

**तृ. छा.** विदेशीयानां अस्मिन् का प्रतिपत्तिः ?

**आचार्यः** नाट्यसङ्केतेषु अभिनये च भवति तेषां श्रद्धा। विदेशीयेषु विश्वविद्यालयेषु बहुत्र अनुसन्धानमपि कूटियाट्टमधिकृत्य प्रचलति।

**प्र. छा.** केरलेषु कूटियाट्टं पठितुम् अवसरः कुत्र अस्ति ?

**आचार्यः** केन्द्रसङ्गीतनाटक-अक्कादमीद्वारा अष्टसु स्थानेषु कूटियाट्टं पाठयति। तद्वत् केरलकलामण्डले अपि पठितुम् अवसरः अस्ति। बहवः अत्र आगच्छन्ति। पठन्ति च।

**द्वि. छा.** अध्येतुं कियान् कालः अपेक्ष्यते ?



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



आचार्यः वस्तुतः पूर्णं जन्म आवश्यकम्। उक्तं खलु भरतेन -
*"एकस्यापि न वै शक्तम् अन्तं ज्ञानार्णवस्य हि।*
*गन्तुं किं पुनरन्येषां ज्ञानानाम् अर्थतत्वतः"*।
एवं बहुज्ञानसम्पूर्णस्य नाट्यस्य समग्राध्ययनम् एकेन जन्मना न शक्यम्। तथापि षड्भिः अष्टभिर्वा वर्षैः कूटियाट्टप्रयोगस्य अधीतिरिति प्रथमसोपानम् अधिरोढुं शक्यते। पुनः बोधाचरणप्रचारणैरेव नाट्यविद्येयं पूर्णा भवति। आधुनिके काले भवत्सु कति एतादृशाध्ययनार्थं सन्नद्धाः?

तृ. छा. वयं सर्वे तत्पराः स्मः। भवादृशनां जीवनं तदर्थं मार्गनिर्देशकं भवतु। स्वस्ति, साधयामो वयम्।

आचार्यः स्वस्त्यस्तु वः।

**कूटियाट्टप्रयोगाय स्वीकृतानि कतिपयानि संस्कृतरूपकाणि**

भासस्य त्रयोदश रूपकाणि।
कुलशेखरस्य सुभद्राधनञ्जयम्, तपतीसंवरणं च।
शक्तिभद्रस्य आश्चर्यचूडामणिः।
बोधायनस्य भगवदज्जुकीयम्।
महेन्द्रविक्रमपल्लवस्य मत्तविलासप्रहसनम्।
नीलकण्ठस्य कल्याणसौगन्धिकम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## पद्मश्री पी. के. नारायणन् नम्प्यार्



कर्मरङ्गः - कूटियाट्टम्, नङ्यार्कूत्त्, पाठकम्।

जननं - २७-५-१९२६

देशः - किल्लिक्कुरिश्शिमङ्गलम्, लक्किटी, पालक्काट्।

पिता -पद्मश्री माणिमाधवचाक्यार्

माता - श्रीदेवी नङ्यारम्मा।

गुरवः - कोच्चाम्पिल्लि रामन् नम्प्यार्।
पन्निश्शेरि शङ्करन् नम्पूतिरिप्पाट्।
मेलेटत्तु गोविन्दन् नम्प्यार्।

रचनाः - अन्तकवधम् (संस्कृतरूपकम्)
श्रीकृष्णचरितं नङ्यार्कूत्तु (कलाग्रन्थः)
मन्त्राङ्कम् (कलाग्रन्थः)
पुलिन्दीमोक्षः (मञ्जूषासमाहारः)
भगवद्दूत् संस्कृतचम्पूः (पठनग्रन्थः)

अनुसन्धानम् - कूटियाट्टं नाट्यशास्त्रं च।
कूटियाट्टं नाट्ययज्ञम्।

पुरस्कारः - पद्मश्री , नृत्तनाट्यपुरस्कारः, डागोर् पुरस्कारः, केन्द्रसंगीतनाटक अक्कादमीफेलोषिप्,गुरुवायूरप्पन् पुरस्कारः, पाणिपादतिलकः, पाठककलारत्नः इत्याद्याः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## पठनप्रवर्तनानि

१. पाठभागात् संश्लिष्टपदानि चित्वा विश्लेषयतु।

२. प्रश्नवाचकपदान्युपयुज्य प्रश्नवाक्यं रचयतु।

( कुत्र, किम्, कः, कियत्, कदा, कति)

उदा - अहं **तिरुवनन्तपुरे** वसामि। भवान् **कुत्र** वसति?

क. अहं **संस्कृतं** पठामि।

ख. नारायणन् नम्ब्यार् महोदयः **१९२६** तमे वर्षे जनिमलभत।

ग. **भरतमुनिः** नाट्यशास्त्रस्य रचयिता भवति।

घ **६४** कलाः विद्यन्ते।

ङ. अहं **प्रयोगपर्यन्तं** कूटियाट्टम् अभ्यसितवान्।

३. भारतीयकलासु कूटियाट्टस्य स्थानं तथा तस्य विशेषता इति विषये चर्चां कृत्वा टिप्पणीं लिखतु।

## व्याख्या

### विस्तरांशः

| | | |
|---|---|---|
| साक्षात्कारः | - | अभिमुखभाषणम्। |
| अभिवादयामहे | - | वयं नमस्कुर्मः |
| | - | अभि पूर्वक वदि अभिवादनस्तुत्योः आत्मने लट् उ.पु.ब.व.। |
| स्वस्त्यस्तु | - | स्वस्ति + अस्तु। |
| को विशेषः | - | कः + विशेषः। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## दकारान्तः सर्वनामशब्दः 'तद्' शब्दः (पुंसि)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | सः | तौ | ते। |
| द्वितीया | तम् | तौ | तान्। |
| तृतीया | तेन | ताभ्याम् | तैः। |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः। |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः। |
| षष्ठी | तस्य | तयोः | तेषाम्। |
| सप्तमी | तस्मिन् | तयोः | तेषु। |

## विस्तरांशः

जिज्ञासवः - ज्ञातुम् इच्छवः।
पृच्छन्तु - प्रच्छि ज्ञीप्सायां लोट् पर प्रपु ब व।
बह्व्यः - बहवः।
ममैवम् - मम + एवम्।
अधुनापि - अधुना + अपि।
निहिता - गुप्ता।
संस्कृतमेवासीत् - संस्कृतम् एव + आसीत्।
रूपकाण्येव - रूपकाणि + एव।
उत्सुकाः - तत्पराः।
अद्यापि - अद्य + अपि।
इत्येव - इति + एव।
विदेशेष्वपि - विदेशेषु + अपि।
प्रतिपत्तिः - आग्रहः।
इत्यपि - इति + अपि।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## विस्तरांशः

| | | |
|---|---|---|
| बहुत्र | - | विभिन्नस्थलेषु। |
| एकस्यापि | - | एकस्य + अपि। |
| पुनरन्येषां | - | पुनः + अन्येषाम्। |
| अधीतिरिति | - | अधीतिः + इति। |
| अधीतिः | - | अध्ययनम्। |
| भवतु | - | अस्तु। |
| | | भू सत्तायाम् पर लोट् प्र पु ए व। |

| *पुरुषः* | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| प्रथमपुरुषः | **भवतु/भवतात्** | **भवताम्** | **भवन्तु** |
| मध्यमपुरुषः | **भव/भवतात्** | **भवतम्** | **भवत** |
| उत्तमपुरुषः | **भवानि** | **भवाव** | **भवाम** |

## विद्यासोपानानि

**अधीतिबोधाचरणप्रचारणाः –** अधीतिः - अध्ययनम्, बोधः - ग्रहणम्, आचरणं - प्रयोगः, प्रचारणं - समाजे प्रसारणम् इति चतुर्भिः अंशैः एव विद्या पूर्णतामुपैति।

## चाक्रिकारोहणप्रक्रिया

भारतीयकलासम्बन्धिनां स्थानानां वस्तूनां च चित्राणि सञ्चित्य प्रदर्शयत।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com





# कृष्णशिलासु लास्यम्।

पुरीतः कोणार्कं प्रति पन्थाः एका ऋजुरेखा भवति। मार्गे ३२ कि. मी. परिमितं दूरं वर्तते। पन्थानम् उभयतः आवासस्य लक्षणमपि न दृश्यते। प्राचीनाः ग्रामाः तेषु प्रान्तेषु विलयीभूताः इति प्रतीयते। पन्थानं प्रविष्टे जगन्नाथस्य रथोत्सवश्रुतयः शनैर्मन्दीभूताः इव अनुभवेयुः। अस्यां धन्यस्थल्यां विराजमाने सूर्याय सङ्कल्पिते अलोकसामान्ये मन्दिरे आराधना न भवति। सप्तशतवर्षात्पूर्वं सफलीकृतमिदं शिलाकाव्यं स्तोत्राणि तथा अर्चनाश्च कथं असङ्गतानि अकरोत्? कोणार्कमार्गं प्रविष्टे एव वयं तस्य इतिहासस्य सङ्कीर्णखनीषु अवगाढाः भवामः। ओडीषायाः भूस्थितिरस्माभिः नात्र अतिगम्यतेऽधुना, परन्तु पुरावृत्तानाम् आत्मार्पणानाञ्च प्रकाशखण्डानि एव। किञ्चिद्गमनेन उभयतः वनानि प्रत्यक्षमायान्ति। पवने वाति सति तेभ्यः कानिचन स्वरवैचित्र्याणि आविर्भवन्ति। शिलाकाव्यानां प्रौढं भूतकालमेव



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



ते स्वराः स्मारयन्ति। नागरिकतायाः स्पर्शम् अननुभूयमाने तस्मिन् काननान्ते भारतसंस्कृतेः ज्योतिश्शिखरं रूपवत्कुर्वन्नासीत्। स्थपतेः क्षुरिकाकुठाराद्यायुधस्य स्पर्शेन प्रत्येकं शिला अत्रैव खलु सचेतना जाता। अमृतसदृशमेतत्पैतृकम्। प्रज्ञायाः तादृशं तरङ्ग-दैर्घ्यं येषां सन्ति ते एव कोणार्कस्य राजसप्रभावम् इतः सम्मुखीकुर्वन्ति।

यानम् उभयतः क्षणं दृश्यमानेभ्यः वनेभ्यः हरिणाः न आगच्छेयुः। नैतत् तादृशमावासस्थानं खलु। मानवैर्मृगजातिभिः च सममेव त्यक्ता सेयं भूमिरिति भाति। गते किञ्चिद् दूरं, पौराणिकेषु अशरीरिषु स्थानं न भवतीतिवत् सेतुरेकः दृष्टिपथम् आगच्छति। यः प्राचीने कस्मिंश्चिद्

## कोणार्कमन्दिरम्

त्रयोदशशतके नरसिंहदेवमहाराजस्य शासनकाले निर्मितमिदं सूर्यमन्दिरम्। कोणार्क इति नाम कोणः अर्कः इति द्वाभ्यां संस्कृतपदाभ्यां अभवत्। कृष्णशिलाभिः सूर्यदेवस्य रथमातृकायां निर्मितम् इदं मन्दिरं कृष्णविमानकः इति नाम्नापि प्रसिद्धमभवत्। मन्दिरस्य ६० मीट्टर् उन्नतः प्रधानमण्डपः तथा तत्पार्श्वस्थः जगमोहनमण्डपः च ध्वंसितौ दृश्येते। भ्रष्टावशिष्टाः तत्रत्ये कोणार्कपुरावस्तुकौतुकागारे (Archeological Museum) प्रदर्शिताः सन्ति।

इदानीं मन्दिरस्योपपालनं भारतीय-पुरातत्वानुदर्शनसंस्थया (Archeological Survey of India) क्रियते। १९८५ तमे वर्षे इदं मन्दिरं विश्व-पैतृककेन्द्रम् इति युनेस्को संस्थया उद्घोषितम् अभवत्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## आषा मेनोन्



आषा मेनोन् इति तूलिकानाम्ना विख्यातः के. श्रीकुमार् महाशयः १९४७ तमे वर्षे नवम्बर् १८ दिनाङ्के पालक्काट् कोल्लङ्कोट् देशे जनिमलभत। विज्ञानविषये बिरुद-धारिणः तस्य विद्याभ्यासः चिट्टूर्, पालक्काट्, चेन्नै इत्यादि स्थलेषु आसीत्। सौत्त् इन्ड्यन् बैंक् इति संस्थायां ३५ वर्षं यावत् सेवनमनुष्ठीय २००६ तमे वर्षे स्वयं विरतः। साहित्ये सङ्गीते सञ्चारे परिस्थितौ विमर्शे च आकृष्टः असौ कैरल्यां तनुमानसी, नादतनुमनिशम्, इलमुळच्चिकळ्, परागकोशङ्ङळ् इत्यादि विंशत्यधिकाः कृतीः रचितवान्। साहित्य-अक्कादमी पुरस्कारः, ओटक्कुषल् पुरस्कारः इत्यादीन् पुरस्कारान् असौ अलभत।

**आवासस्थाने विद्यमानायाः नागरिकतायाः सुदृढं चिह्नमेव । प्राचीनद्याः तिरश्चीनो भवत्येषः सेतुः। ओडीषायाः विश्रुतया 'प्रतिभा रे' नामिकया आख्यात्र्या एषा नदी प्राचीप्रभेति कथ्यते। प्राचीं प्रवहन्ती नदी इत्यतः एव प्राची इति नाम प्रसिद्धं भवेत्। अत्र विद्यमानासु नदीषु परिपक्वा कविता दरीदृश्यते। चित्रोत्पला, कुशभद्रा, चन्द्रभागा इत्याद्याः। चन्द्रभागा यत्र सागरं संस्पृशति तत्रैव शिल्पकलायाः परा काष्ठेति पश्चात् प्रसिद्धं सूर्यमन्दिरं प्रादुरभवत्। सूर्यं भ्रमन्त्याः पृथिव्याः भ्रमणपथे विद्यमानेषु सविशेषबिन्दुषु**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**अन्यतमः भवति कोणार्कः। तत्र तावत् सूर्यमरीचयः सविशेषसान्द्रतया प्रपतन्ति। सम्पूर्णस्य सूर्यग्रहणस्य दर्शनाय सङ्कल्पितेषु स्थानेषु अन्यतमो भवत्ययं देशः। १४८० (अशीत्युत्तर एकोनविंशतिसहस्रतमे वर्षे) फेब्रुवरीमासे १६ (षोडशे) दिनाङ्के गोकर्णात् आरभ्य कोणार्के समापितः सूर्यग्रहणस्य पन्थाः ज्योतिश्शास्त्रविचक्षणानां महतः आनन्दस्य स्थानमभवत्।**

---

*आषामेनोन् महाशयस्य हिमालयप्रत्यक्षङ्ङल् इति यात्राविवरणग्रन्थः प्रसिद्धः। तत्र कृष्णशिलकळुटे लास्यम् इति अध्यायं केचन संस्कृताध्यापकाः तेन सह स्थित्वा संस्कृतभाषया अन्ववदन्। तत्रस्थाः केचन भागः पाठभागे दत्तः।*

---

## पठनप्रवर्तनानि

१. पाठादस्मात् शैलीं स्वांशीकृत्य एकं लघुयात्राविवरणं लिखतु।

२. कोणार्क् मन्दिरस्य प्राधान्यम् इतिहासे तस्य स्थानं च अधिकृत्य टिप्पणीं लिखतु।

३. भूतकालार्थे वाक्यं परिवर्तयतु।

[redacted]

४. पाठभागात् सन्धियुक्तपदानि चित्वा विश्लेष्यतु।

५. विज्ञानस्य कलायाश्च सामञ्जस्यं भारतस्य रीतिरासीत् इति विषये संवादं करोतु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## व्याख्या

विस्तरांशः

पन्थाः - मार्गः। माकिं - अनिश्चितार्थे प्रयुक्तमव्ययम्।

ऋजुरेखा - अवक्ररेखा। उभयतः - उभयोः पार्श्वयोः।

शनैः - मन्दम्।

अनुभवेयुः - अनु + भू सत्तायां वि.लिङ् पर प्र.पु.बव।

अलोकसामान्ये- न लोकसामान्ये, लोके न साधारणतया दृश्यमाने।

असङ्गतानि - न युक्तानि। अवगाढाः- मग्नाः।

अतिगम्यते - अतिक्राम्यते कर्मणि लट् प्र पु ए व।

पवने वाति सति - यदा पवनः वाति तदा (सति सप्तमी)।

स्मारयन्ति - स्मृ चिन्तायां णिचि पर. लट् प्र.पु.ब.व।

### अकारान्तः नुपंसकलिङ्गः 'मन्दिर' शब्दम्

| *विभक्तिः* | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| ***प्रथमा*** | मन्दिरम् | मन्दिरे | मन्दिराणि। |
| ***सं प्रथमा*** | हे मन्दिर | हे मन्दिरे | हे मन्दिराणि। |
| ***द्वितीया*** | मन्दिरम् | मन्दिरे | मन्दिराणि। |
| ***तृतीया*** | मन्दिरेण | मन्दिराभ्याम् | मन्दिरैः। |
| ***चतुर्थी*** | मन्दिराय | मन्दिराभ्याम् | मन्दिरेभ्यः। |
| ***पञ्चमी*** | मन्दिरात् | मन्दिराभ्याम् | मन्दिरेभ्यः। |
| ***षष्ठी*** | मन्दिरस्य | मन्दिरयोः | मन्दिराणाम्। |
| ***सप्तमी*** | मन्दिरे | मन्दिरयोः | मन्दिरेषु। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## विस्तरांशः

अननुभूयमाने - न अनुभूयमाने। स्थपतेः - शिल्पिनः।
क्षुरिका - उळि इति भाषायाम्। कुठारः - परशुः।
दृष्टिपथम् - दृष्टेः पन्थाः दृष्टिपथाः तं दृष्टिपथम्।
प्राची - पूर्वा दिशा। दरीदृश्यते - पुनः पुनः दृश्यते।
परा काष्ठा - उच्चावस्था। सूर्यमरीचयः - सूर्यरश्मयः।
शनैर्मन्दीभूताः - शनैः + मन्दीभूताः।
अर्चनाश्च - अर्चनाः + च
भूस्थितिरस्माभिः - भूस्थितिः + अस्माभिः।
अतिगम्यतेऽधुना - अतिगम्यते + अधुना।
रूपवत्कुर्वन्नासीत् - रूपवत् + कुर्वन् + आसीत्।
अतैव - अत्र + एव। नैतत् - न + अतत्।
मृगजातिभिश्च - मृगजातिभिः + च। सेयम् - सा + इयम्।
भूमिरिति - भूमिः + इति। स्थानन्न - स्थानम् + न।
भवन्तीतिवत्- भवन्ति + इतिवत्। सेतुरेकः - सेतुः + एकः।
भवत्येषः - भवति + एषः। इत्यतः - इति + अतः।
प्राचीप्रभेति - प्राचीप्रभा इति। तत्रैव - तत्र + एव।
काष्ठेति - काष्ठा + इति। भवत्ययम् - भवति + अयम्।

### चाक्रिकारोहणप्रक्रिया

कलापारम्पर्यमिव भारतीयशास्त्रपारम्पर्यमपि प्रसिद्धमेव। यथा भास्कराचार्यः ज्योतिशास्त्रकारः। भारतीयशास्त्रकाराणां नामानि तथा तेषां योगदानं च पट्टिकारूपेण विलिख्य प्रदर्शयतु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com




निबन्धः

# सुघटिता भाषा।

लोके विविधाः भाषाः उपयुज्यन्ते। अधुना यान्त्रिकभाषा अपि विभाविता दृश्यते। ज्ञानस्य स्वीकारः, संरक्षणं, संविवेकः संवेदनमिति प्रक्रिया एव भाषाद्वारा क्रियते। एकीभूय प्रवर्धमाने अस्मिन् काले एकत्र संरक्षितस्य संवर्धितस्य ज्ञानस्य सार्वलौकिकत्वम् अपेक्ष्यते एव। मानविकयान्त्रिकभाषयोः मिथः का भाषा प्रयोक्तव्या इति आधुनिकशास्त्रसमूहः चिन्तयति।

भारतीयभाषाविज्ञानं पाणिनीयव्याकरणशास्त्रे न्यायशास्त्रे तथा मीमांसाशास्त्रे च अधिष्ठितं एव वर्तते। पदनिष्पत्तिः वाक्यघटना अर्थबोधनम् इत्यादिविषयेषु बृहती चर्चा तेषु शास्त्रेषु विद्यते। क्रियाकारकघटितः वाक्यसम्भवः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**तथा अर्थबोधनप्रकारः च संस्कृतभाषायाः संग्राहकक्षमतां वर्धयति। अत एव सङ्गणकीयभाषाविज्ञाने संस्कृतस्य प्रमुखं स्थानं कल्पितमस्ति। शास्त्रकाराः संस्कृतभाषायाः इमां विशेषतां प्रयुज्यैव अनुसन्धानकार्येषु जाग्रतया प्रवर्तन्ते।**



### सङ्गणकयन्त्रविशकलनार्थं षट् कार्याणि श्रद्धेयानि

| | |
|---|---|
| Phonetics and Phonology | - उच्चारणादिकार्याणि, पाणिनीयशिक्षा। |
| Morphology | - समस्तपदानां विश्लेषणम्, पदव्युत्पत्तिः, पञ्चवृत्तयः (कृत्तद्धितसमासैकशेषसनाद्यन्तधातवः)। |
| Lexical | - अर्थावगमनाय अमरकोशादिग्रन्थाः। |
| Syntax | - पदानां मध्ये विद्यमानः सम्बन्धः, विभक्तिः। |
| Semantics | - वाक्ये पदानाम् अर्थः , कारकम्। |
| Pragmatics | - विषयानुसारमाशयसम्बन्धः, वाक्यपदीयम्। |

एदादृशीं व्यवस्थां विद्यमानत्वात् संस्कृते सर्वमपि विश्लेषणं सुसाध्यम् इत्यतः अस्य यन्त्रविश्लेषणं सुकरमेव।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## सङ्गणकीयभाषाविज्ञानम्

स्वाभाविकभाषां सङ्गणकयन्त्रेण विश्लेषयित्वा ज्ञानस्य निरूपणमेव सङ्गणकीयभाषाविज्ञानम् (Computational Linguistics)। वक्तुः अभिज्ञानम् (speaker recognition), वागभिज्ञानम् (speech recognition), स्वाभाविकभाषान्तरितं मुखम् (natural language Interface), स्वाभाविकभाषाविश्लेषणम् ( Natural Language Analysis/ Understanding), स्वाभाविकभाषाव्युत्पादनम् (Natural Language Generation), यान्त्रिकानुवादः (Machine Translation), वाणीसंश्लेषणम् ( Speech Synthesis), एतेषु कार्येषु श्रद्धां दत्वा एव सङ्गणकीयभाषाविज्ञानं प्रवर्तते। एतदर्थं विधिद्वयमस्ति। व्याकरणविधिः (Rule Based Approach) साख्यकीयविधिः (Statistical Approach) च। प्रथमे व्याकरणनियमान् प्रदत्वा तदनुसृत्य यन्त्रः विश्लेषयति। द्वितीये तु भाषाप्रयोगान् दृष्ट्वा यन्त्रेण नियमान् आविष्करोति। अस्य यन्त्राधिगम इत्यपि वदति। विश्वे पाणिनीयव्याकरणमेव पूर्णरूपेण रूपात्मकं भवति। तत्तु सङ्गणकस्य कार्यकलापरीत्या (programing) एव संरचितम्। प्रत्याहारसूत्राणि संज्ञासूत्राणि इत्यादिक्रमेण पाणिनिना कृते व्याकरणे संयोजकपरिकल्पने (compiler design) च सादृश्यो दृश्यते। एषा सविशेषता एव सङ्गणकीयभाषाविज्ञानस्य संस्कृतस्य च सम्बन्धे चिन्तयितुं शास्त्रकारान् प्रैरयेत्।

अधुना संस्कृतसङ्गणकीयभाषाविज्ञानं सङ्गणकभाषाविज्ञानस्य शाखा भवति। संस्कृतसङ्गणकविषयिणी चर्चा अधुना शास्त्रसाङ्केतिकवैज्ञानिकस्तरे महता प्रमादेन प्रचलति। सङ्गणके तथा सङ्गणकं संस्कृतस्य कृते इत्यादि बहवः विषयाः चिन्तिताः प्रायोगिकतले आगताश्च।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## पठनप्रवर्तनानि

१. ज्ञानस्य स्वीकारः, संरक्षणं, संविवेकः संवेदनमिति प्रक्रिया एव भाषाद्वारा क्रियते। विषयेस्मिन् चर्चां कृत्वा टिप्पणीं लिखतु।
(चर्चासूचिकाः- भाषायाः उपयोगः, ज्ञानस्य संरक्षणं विनिमयश्च।)

२. सङ्गणकभाषाविज्ञाने संस्कृतस्य प्रसक्तिः इति विषये अन्तर्जालसाहाय्येन बिन्दूनवगत्य लघुटिप्पणिं लिखतु।

## व्याख्या

### विस्तरांशः

अधुना - इदानीम्
विभाविता - विशेषेण चिन्तिता
संविवेकः - सम्यक् विवेचनम्
संवेदनम् - विनिमयः
संग्राहकक्षमता - ग्राहकपटुता
अनुसन्धानकार्यः - गवेषणकार्यः
भाषयोः + च - भाषयोश्च
अर्थबोधनप्रकारः + च - अर्थबोधनप्रकारश्च ।
अतः + एव - अत एव।
प्रयुज्य + एव - प्रयुज्यैव।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## आकारान्तः स्त्रीलिङ्गः 'भाषा' शब्दः

| *विभक्तिः* | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| *प्रथमा* | भाषा | भाषे | भाषाः। |
| *सं प्रथमा* | हे भाषे | हे भाषे | हे भाषाः। |
| *द्वितीया* | भाषाम् | भाषे | भाषाः। |
| *तृतीया* | भाषया | भाषाभ्याम् | भाषाभिः। |
| *चतुर्थी* | भाषायै | भाषाभ्याम् | भाषाभ्यः। |
| *पञ्चमी* | भाषायाः | भाषाभ्याम् | भाषाभ्यः। |
| *षष्ठी* | भाषायाः | भाषयोः | भाषाणाम्। |
| *सप्तमी* | भाषायाम् | भाषयोः | भाषासु। |



## आदर्शप्रश्नाः

१. भारतीयपैतृककलासु *युनेस्को* इति अन्ताराष्ट्रसभायाः अङ्गीकारं प्रथमतया प्राप्ता कला का?
(कथकलि, कूटियाट्टम्, कृष्णनाट्टम्)

२. संस्कृतरूपकेणैव अवतारणम् अधोदत्तेषु कस्मिन् द्रष्टुं शक्यते? (कूटियाट्टम्, यक्षगानम्, अष्टपदी)

३. अधो दत्तेषु प्रमुखः कूटियाट्टाचार्यः कः?
(पद्मश्री पी. के. नारायणन् नम्प्यार्, पेरुवनं कुट्टन् मारार्, कलामण्डलं गोपी)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



४. सूर्याय सङ्कल्पितम् अलोकसामान्यं मन्दिरं कुत्र वर्तते? (अजन्ता, काशी, कोनार्क्)

५. कस्य दर्शनाय सङ्कल्पितेषु स्थानेषु अन्यतमः भवति कोणार्क्? (चन्द्रग्रहणस्य, सूर्यग्रहणस्य, नक्षत्राणाम्)

६. संग्राहकक्षमतमा भाषा का? (संस्कृतभाषा, मलयालभाषा, हिन्दीभाषा)

७. उदाहरणानुसारं विश्लेषयत।

उदा - इत्यस्ति - इति + अस्ति।

क. स्वस्त्यस्तु - ........ + ....... ।

ख. इत्यादिषु - ........ + ....... ।

८. अधोदत्तेषु सङ्गणकभाषाविज्ञाने उपयुक्ता भारतीयभाषा का? (बङ्गला, तेलुगु, संस्कृतम्)

९. लघुयात्राविवरणमेकं लिखतु।

## एककानुसारीणि पठनप्रवर्तनानि

१. भारतीयविज्ञानशाखाः अधिकृत्य चर्चां कृत्वा पट्टिकां करोतु।
(यथा - आयुर्वेदम्, शिल्पशास्त्रम्, न्यायशास्त्रम्, गणितम् ...)

२. भारतीयकलायाः महत्वप्रतिपादनपराणि चित्राणि सङ्ग्रहीतु।

३. ग्रामस्थं कञ्चन संस्कृतविदुषमुपेत्य साक्षात्कारं वितनोतु।

४. आर्द्रता, मानविकता एवं शास्त्रचिन्ताः च समञ्जसिता चारुता एव समाजोत्कर्षतायै अभिलषणीयः इति विषये सङ्घचर्चां करोतु।

५. वैज्ञानिकदृष्ट्या संस्कृतपारम्पर्यस्य प्रभावमधिकृत्य परियोजनां करोतु।

६. कूटियाट्टं दृष्ट्वा आस्वादनटीकां रचयतु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## अभिसमीक्षा



***koodiyattam***


- http://youtu.be/w47m1cyefS4

***Konark temple***

- http://asi.nic.in/
  asi_monu_whs_konark_architecture.asp
- http://www.orissatourism.org/travel-to-orissa/konark/sun-temple-konark.html
- http://konark.nic.in/suntemple.html
- http://youtu.be/JZ51FJST_SU

***sanskrit computational linguistics***

- http://sanskrit.inria.fr/symposium/program.html
- http://sanskrit.inria.fr/symposium/
  DOC/Amba_intro.pdf



- Natyakalpadrumam
  Manimadhava Chakyar Keralakalamandalam
- Himalayapratyakshangal
  Asha Menon - DC Books
- 4th International Symposium, NewDelhi,
  India,December 10-12-2010.proceedings. Editor -
  Dr. Girish Nath Jha. published by - Springer



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते)

| क्रम. सं | पठनप्रवर्तनानि | भागिकतया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
|---|---|---|---|---|
| १ | पाठस्य वाचनमालपनञ्च कृतम्। | | १/२/३/४ | |
| २ | संश्लिष्टपदानि विश्लेषितानि। | | १/२/३/४ | |
| ३ | टिप्पण्यः लिखिताः। | | १/२/३/४ | |
| ४ | परियोजना कृता। | | १/२/३/४ | |
| ५ | विवरणं लिखितम्। | | १/२/३/४ | |
| ६ | प्रश्नवाक्यानि रचितानि। | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

**क्रोडीकरणप्रक्रिया**

**वयं भारतीयानाम् अधमर्णाः भवामः यतो हि कथं मापनं करोति? कथञ्च गणनां करोति? इति ते अस्मान् पाठितवन्तः। शून्यस्य मूल्यमधिकृत्य यति ते न श्रावितवन्तः स्युः तर्हि नूतनाम् आविष्काराणां कृते वयं न समर्थाः अभविष्याम। (आल्बेर्ट् ऐन्स्टीन्)।**

**एककान्तर्गतान् आशयान् एवम् इमामुद्धरणिञ्च आश्रित्य चर्चां करोतु।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com







# निपुणता

'शक्तिर्निपुणतालोकशास्त्रकाव्याद्यवेक्षणात्' इति प्रसिद्धिः। यथाकालं यथादेशं यथोचितं कर्मणः निर्वहणक्षमता एव निपुणता। निपुणतया श्रेयप्रेयसोः प्राप्तिः। जीवितस्य समग्रविजयार्थं नैपुण्यानां समार्जनं अनिवार्यमेव।

अस्य एककस्य प्रथमे पाठे चाणक्येन राष्ट्रसुस्थित्यै दृढचित्ततया कृतानां प्रवर्तनानां विजयप्राप्तिः निर्दिश्यते। शत्रूनपि तैरज्ञात्वा स्वकार्यसिद्ध्यर्थम् उपयुज्य, प्रतीपावसरानपि स्वानुकूलं परिणमय्य, रिपुपक्षविजयाय कृतप्रयत्नं दृढप्रत्ययमपि अमात्यराक्षसं तस्य गुणोत्कर्षपरिगणनया अर्हात् मरणदण्डात् विमुच्य चन्द्रगुप्तविश्वस्तं करोति च। स्वगूढतन्त्रप्रयोगैः कौटिल्यः यद्यपि सर्वविजयं लभते तथापि अनासक्तः सन् अधिकाराद् बहुदूरमेवावर्तत इति तस्य प्रबन्धकस्य अनुकरणीयो गुणविशेषः।

श्रीमद्भगवद्गीतायाम् अर्जुनं श्रीकृष्णः उत्तमप्रबन्धकगुणान् यान् बोधयति तान् द्वितीये पाठे प्रतिपादयति। आयासनिवारणम्, व्यक्तित्वविकासः, विभवविनिमयम्, च सुव्यक्तं निरूपितमस्मिन् गीतासन्दर्भे।

प्रकृत्या सह निलीय अनुलोमगतिर्जीवितपद्धतिरेव योगशास्त्रस्य परिकल्पना। अर्थात् प्रकृतिव्यक्तिजीवितयोः सम्यक् योगः एव योगः। शारीरिक-मानसिक-वैकारिकसुस्थित्या नैपुण्यानि आर्जयितुं योगशास्त्रस्य योगदानम् अन्तिमपाठभागेन सूचितम् ।

Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## मुख्यपठनाधिगमाः

- संश्लिष्टपदानि विश्लेषयति।
- नाटकं कर्तारं चाधिकृत्य टिप्पणीं लिखति।
- भगवद्गीतां योगशास्त्रं च अधिकृत्य चर्चते।
- योगस्य प्राधान्यं विशदयति।
- विविधानि प्रबन्धनतन्त्राणि क्रोडीकरोति।
- उत्तमव्यक्तिगुणानां पट्टिकां करोति।
- नैपुण्यप्रवर्धकोपायान् क्रोडीकरोति।

**प्रवेशिका**

"अमन्त्रमक्षरं नास्ति
नास्ति सस्यमनौषधम्।
अयोग्यः पुरुषो नास्ति
योजकस्तत्र दुर्लभः।।"

श्लोकस्य अस्य आशयमधिकृत्य चर्चां चालयतु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com





# निर्ममो योजकः ।

राजा - (चाणक्यमुपसृत्य) आर्य, चन्द्रगुप्तः प्रणमति ।

चाणक्यः - (राजानमुपसृज्य) अयममात्यराक्षसः प्राप्तः । प्रणमैनम् ।

राजा - (राक्षसमुपसृत्य) आर्य, चन्द्रगुप्तः प्रणमति ।

राक्षसः - (विलोक्य स्वगतम्) अये चन्द्रगुप्तः । य एषः-

*बाल एव हि लोकेऽस्मिन्संभावितमहोदयः ।*
*क्रमेणारूढवान् राज्यं यूथैश्वर्यमिव द्विपः ।।*

(प्रकाशम्) राजन्, विजयस्व ।

राजा - आर्य,

*जगतः किं न विजितं मयेति प्रविचिन्त्यताम् ।*
*गुरौ षाड्गुण्यचिन्तायामार्ये चार्ये च जाग्रति ।।*



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**राक्षसः** - (स्वगतम्) स्पृशति मां भृत्यभावेन कौटिल्यशिष्यः। अथवा विनय एवैष। चन्द्रगुप्तस्य मत्सरस्तु मे विपरीतं कल्पयति। सर्वथा स्थाने यशस्वी चाणक्यः। कुतः-

*द्रव्यं जिगीषुमधिगम्य जडात्मनोऽपि*
*नेतुर्यशस्विनि पदे नियता प्रतिष्ठा।*
*अद्रव्यमेत्य भुवि शुद्धनयोऽपि मन्त्री*
*शीर्णाश्रयः पतति कूलजवृक्षवृत्त्या ।।*

**चाणक्यः** - अमात्यराक्षस, इष्यते चन्दनदासस्य जीवितम्।

**राक्षसः** - भो विष्णुगुप्त, कुतः सन्देहः?

**चाणक्यः** - अमात्यराक्षस, अगृहीतशस्त्रेण भवतानुगृह्यते वृषल इत्यतः सन्देहः। तद्यदि सत्यमेव चन्दनदासस्य जीवितमिष्यते, ततो गृह्यतामिदं शस्त्रम्।

**राक्षसः** - भो विष्णुगुप्त, मा मैवम्। अयोग्या वयमस्य ग्रहणे विशेषतस्त्वया गृहीतस्य शस्त्रस्य।

**चाणक्यः** - राक्षस, योग्योऽहं त्वमयोग्य इति किमनेन? न खलु भवतः शस्त्रग्रहणमन्तरेण चन्दनदासस्य जीवितमस्ति।

## मुद्राराक्षसम्

विशाखदत्तेन विरचितं भवति मुद्राराक्षसं नाटकम्। अस्मिन् नाटके सप्त अङ्काः सन्ति। नाटकेऽस्मिन् चाणक्याचार्यस्य कौटिल्यं राष्ट्रमीमांसायाः तत्वानि च वर्णितानि। अभिप्रेतं कार्यं साधयितुं महात्मभिः तैराविष्कृतानि तन्त्राणि हृदयावर्जकानि भवन्ति। नीतिबोधस्य परा काष्ठा अस्मिन् नाटके दृश्यते। विरलतया एव स्त्रीपात्राणां चित्रणम्। वीररसप्रधाने प्रख्यातेतिवृत्तयुक्तेऽस्मिन् सात्वती आरभटी वृत्तिः वर्तते। विशाखदत्तस्य कालमधिकृत्य मतभेदः अस्त्यपि सोऽयं चतुर्थपञ्चमशतकयोः मध्ये लब्धजन्मा इति विदुषां मतम्। नाटकस्य अस्य अन्तिमभागः पाठ्यांशत्वेन योजितः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



राक्षसः - (स्वगतम्) नन्दस्नेहगुणाः हृदयं स्पृशन्ति, तद्विद्विषां भृत्योऽस्मि, ये द्रुमाः स्वयं सिक्ताः एव वृद्धिम् अगमन् ते छिन्नाः एव । मित्रस्य शरीररक्षणकृते मया शस्त्रं व्यापारणीयम्, कार्याणां गतयः चिरात् विधेरपि आज्ञाकरत्वं न यान्ति।

(प्रकाशम्) विष्णुगुप्त, नमः सर्वकार्यप्रतिपत्तिहेतवे सुहृत्स्नेहाय। का गतिः। एषः प्रह्वोऽस्मि।

चाणक्यः - (सहर्षम्) वृषल वृषल, अमात्यराक्षसेनेदानीमनुगृहीतोऽस्मि। दिष्ट्या वर्धते भवान्।

राजा - आर्यप्रसाद एष चन्द्रगुप्तेनानुभूयते।

पुरुषः - जयत्वार्यः। एष खलु भद्रभटभागुरायणप्रमुखैः संयमितकरचरणो मलयकेतुः प्रतिहारभूमिमुपस्थितः। इदं श्रुत्वा आर्यः प्रमाणम्।

चाणक्यः - भद्र, निवेद्यतामात्यराक्षसाय । सोऽयमिदानीं जानीते।

राक्षसः - (स्वगतम्) दासीकृत्य मामिदानीं विज्ञापनाय मुखरीकरोति कौटिल्यः। का गतिः?

(प्रकाशम्) राजन् चन्द्रगुप्त, विदितमेव ते यथा वयं मलयकेतौ कंचित्कालमूषितास्तत् परिरक्ष्यन्तामस्य प्राणाः।

राजा - (चाणक्यमुखमवलोकयति)

चाणक्यः - प्रतिमानयितव्योऽमात्यराक्षसस्य प्रथमः प्रणयः।

(पुरुषं प्रति)

भद्र ! अस्मद्वचनादुच्यन्तां भद्रभटप्रमुखा यथा अमात्यराक्षसेन विज्ञापितो देवश्चन्द्रगुप्तः प्रयच्छति मलयकेतवे पित्र्यमेव विषयम्। अतो गच्छन्तु भवन्तः सहानेन। प्रतिष्ठिते चास्मिन्पुनरागन्तव्यम् इति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## कथापात्राणि

१.**चाणक्यः** - कौटिल्यः। विष्णुगुप्तः। चन्द्रगुप्तस्य गुरुः।

२.**राक्षसः** - नन्दराजस्य प्रधानामात्यः। सर्वार्थसिद्धेः अमात्यः मलयकेतुना सार्धं सन्धिं कृत्वा चन्द्रगुप्तस्य स्थानभ्रंशनार्थं प्रयत्नमकरोत्। किन्तु पुनः स्वसुहृदः चन्दनदासस्य प्राणरक्षार्थं चन्द्रगुप्तस्य अमात्यपदं स्वीकर्तुं प्रेरितोऽभूत्।

३. **पुरुषः** - चाणक्यानुचरः।

४. **राजा** - चन्द्रगुप्तः।चाणक्यशिष्यः। पाटलीपुत्रस्य युवराजा मौर्यसाम्राज्यस्थापकः।

५. **चन्दनदासः** - वणिक्श्रेष्ठः। अमात्यराक्षसस्य प्रियसुहृत्।

**पुरुषः** - **(परिक्रामति) यदार्य आज्ञापयतीति।**

**चाणक्यः** - **भद्र ! तिष्ठ तिष्ठ। अपरं च वक्तव्यो दुर्गपालः - अमात्यराक्षसलाभेन सुप्रीतश्चन्द्रगुप्तः समाज्ञापयति श्रेष्ठी चन्दनदासः स पृथिव्यां सर्वनगरश्रेष्ठिपदमारोप्यतामिति।**

**अपि च** - ***सह वाहनहस्तिभ्यां मुच्यतां सर्वबन्धनम्।***
***मया पूर्णप्रतिज्ञेन केवलं बध्यते शिखा।।***

**पुरुषः** - **यदार्य आज्ञापयतीति।**
**(निष्क्रान्तः)**

**चाणक्यः** - **भो राजन् चन्द्रगुप्त, उच्यतां किं वां भूयः प्रियमुपकरोमि।**

**राजा** - **किमतः परमपि प्रियमस्ति।**

***राक्षसेन समं मैत्री राज्ये चारोपिता वयम्।***
***नन्दाश्चोन्मूलिताः सर्वे किं कर्तव्यमतः परम्।।***

**(निष्क्रान्ताः सर्वे)**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## पठनप्रवर्तनानि

१. संश्लिष्टपदानि चित्वा पट्टिकायां निवेशयतु।

२. नाटकांशं कथारूपेण परिवर्तयतु।

३. नाटकसन्दर्भे चाणक्येन प्रयुक्तानि प्रबन्धनतन्त्राणि क्रोडीकृत्य पात्रस्वभावं निरूपयतु।

सूचिका: - अमात्यराक्षसस्य पक्षपरिवर्तनम्। चन्द्रगुप्तस्य राजाभिषेकम्। नन्दवंशस्य उन्मूलनम्। प्रजानां मनःपरिवर्तनम्। चाणक्यस्य कर्मकुशलता। राज्यतन्त्रज्ञता।

४. प्रक्रियापुटम् - रिक्तस्थानानि पूरयतु।

| धातुः | लट् | क्तप्रत्ययान्तम् | क्तवत्प्रत्ययान्तम् |
|---|---|---|---|
| गम् | गच्छति | गतः | गतवान् |
| लिख् | | | लिखितवान् |
| पठ् | पठति | | |
| वद् | | उक्तः | |

## निष्ठाप्रत्ययौ

क्त - प्रत्ययस्य क्तवतु - प्रत्ययस्य च निष्ठा इति संज्ञा। उभौ प्रत्ययौ भूतकालेऽर्थे उपयुज्येते। त्रिषु लिङ्गेष्वपि प्रयोक्तुं शक्यते। वाक्ये भूतकालक्रियायाः स्थाने तदर्थे क्तक्तवतू प्रत्ययौ प्रयुज्येते। तत्र क्तप्रत्ययः कर्मण्यर्थे क्तवत्प्रत्ययः कर्तर्यर्थे च। गत्यर्थधातुषु क्तप्रत्ययः कर्तर्यपि प्रयुज्यते।

यथा- सन्तोषः अगच्छत्। सन्तोषः गतवान्।

तया संस्कृतम् अपठ्यत। तया संस्कृतं पठितम्।

गम्लृ गतौ - गतं,गतः,गता-गतवत्,गतवान्,गतवाती।

पठ् पठने-पठितं, पठितः, पठिता - पठितवत्, पठितवान्, पठितवती



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## व्याख्या

**विस्तरांश:**

सम्पन्नास्ते - सम्पन्नाः + ते। सम्पन्नाः - सिद्धाः

योजकः - आयोजकः। यः योजयति सः

सर्वाशिषः- यत् यत् आशास्यमासीत् मे यत् यत् आशासितं त्वया वा तत्सर्वम् इत्यर्थः। अभिवादयस्व - प्रणम

स्वगतम् -अश्राव्यं स्वगतं मतम्। स्वगतं स्वहृदि स्थितम्।

योजितोऽनेन - योजितः + अनेन।

प्रणमैनम् - प्रणम + एनम्।

**गद्यक्रमः**

बाल एव हि अस्मिन् लोके सम्भावितमहोदयः यूथैश्वर्यं द्विपः इव क्रमेण राज्यम् आरूढवान्।

विजयस्व - वि + जी जये आत्म. लोट्. म.पु.ए.व.

**विस्तरांश:**

बाल्यादारभ्यैव हि अस्मिन् लोके सम्भावितमहोदयः- सम्भावितः- तर्कितः महान् उदयः- उन्नतिः यस्य तथाभूतः यूथैश्वर्य - यूथस्य गजयूथस्य ऐश्वर्यं- नेतृत्वम् द्विपः - हस्ती

**तकारान्तः सर्वनामशब्दः 'भवत्' शब्दः (पुंसि)**

| *विभक्तिः* | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
|---|---|---|---|
| *प्रथमा* | भवान् | भवन्तौ | भवन्तः |
| *द्वितीया* | भवन्तम् | भवन्तौ | भवतः |
| *तृतीया* | भवता | भवद्भ्याम् | भवद्भिः |
| *चतुर्थी* | भवते | भवद्भ्याम् | भवद्भ्यः |
| *पञ्चमी* | भवतः | भवद्भ्याम् | भवद्भ्यः |
| *षष्ठी* | भवतः | भवतोः | भवताम् |
| *सप्तमी* | भवति | भवतोः | भवत्सु |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



इव क्रमेण शनैः राज्यम् आरूढवान् - आक्रान्तवान्(प्राप्तवान्)।

बाल्यमारभ्य एव राजलक्षणत्वात् महाराजो भविष्यतीति सङ्कल्पितः एषमहाशयः। इदानीं गजयूथस्य नेतृत्वं हस्ती इव राज्यम् आरुढ्वान्।

प्रकाशम् - सर्वश्राव्यं प्रकाशं स्यात्। प्रकाशं ज्ञाप्यमन्येषाम्।

**गद्यक्रमः**

गुरौ आर्ये च आर्ये षाड्गुण्यचिन्तायां जाग्रति जगतः मया किं न विजितम् इति प्रविचिन्त्यताम्।

**विस्तरांशः**

गुरौ चाणक्ये मान्ये भवति राक्षसे च सन्धिविग्रहादीनां षण्णां गुणानां चिन्तया जागरूके सति जगति मया किं न विजितम्? सर्वमेव विजितमिति भावः।

सन्धिः, विग्रहः आसनम्, यानम्, संश्रयः, द्वैधीभावः येषां गुणानां चिन्तायां कर्तव्याकर्तव्यत्वभावनायां जाग्रति जागरूके सति जगतः- जगति मया किं न विजितम् (अपि तु सर्वमेव जितम्) इति - एतत् प्रविचिन्त्यताम् - अवधार्यताम्।

यशस्वी- यशः अस्य अस्तीति।

**गद्यक्रमः**

द्रव्यं जिगीषुम् अधिगम्य जडात्मनः अपि नेतुः यशस्विनि पदे प्रतिष्ठा नियता, तु शुद्धनयोऽपि मन्त्री अद्रव्यम् एत्य शीर्णाश्रयः कूलजवृक्षवृत्या भुवि पतति।

**विस्तरांशः**

द्रव्यं - सत्पात्रं (श्रेयप्राप्तियोगं) जिगीषुम् - विजयशीलम्, अधिगम्य- प्राप्य, जडात्मनः - असमर्थस्य अपि नेतुः - उपदेष्टुः(अमात्यस्य) यशस्विनि- यशः प्रदायके, पदे- स्थाने, प्रतिष्ठा- सुस्थितिः, नियता - निश्चिता(भवति) किन्तु अद्रव्यम्- श्रेयः प्राप्तौ अनुत्सुकं (असत्पात्रम्) एत्य - प्राप्य, शुद्धनयः नीतिप्रयोगकुशलः अपि मन्त्री - अमात्यः शीर्णाश्रयः नष्टाधिष्ठानः सन् कूलजवृक्षवत्त्या नदीतीरवृक्षमिव



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



भुवि - भूमौ पतति।

**भावार्थः**

सत्पात्रस्य चन्द्रगुप्तस्य आश्रयेण चाणक्यस्य कार्यसिद्धिः। मलयकेतोः असत्पात्रत्वेन तदाश्रयात् मम अमात्यराक्षसस्य कार्यासिद्धिः पतनं च इति भावः।

**विस्तरांशः**

जडात्मनोऽपि कार्यसिद्धिश्चेत् कूर्मबुद्धेः चाणक्यस्य कथा किमु वक्तव्या इत्यर्थापत्तिः। सत्पात्रमित्यस्य उत्पतिष्णुरिति, असत्पात्रमित्यस्य तद्विपरीतमिति चार्थः।

शीर्णाश्रयः - शीर्णः - उच्छिन्नः आश्रयः - अवलम्बनं यस्य सः

कूलजवृक्षवृत्या- कूलजस्य - नदीतीरजातस्य वृक्षस्य वृत्या-

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | **आसीत्** | **आस्ताम्** | **आसन्** |
| मध्यमपुरुषः | **आसीः** | **आस्तम्** | **आस्त** |
| उत्तमपुरुषः | **आसम्** | **आस्व** | **आस्म।** |

व्यवहरेण भुवि- पृथिव्यां पतति। जेतुम् इच्छुः जिगीषुः।

इष्यते- इष इच्छायां कर्मणि लट् आत्मनेपदं प्र.पु ए.व

अगृहीतशस्त्रेण- अनादत्तायुधेन।

वृषल - चन्द्रगुप्तसम्बोधनं। शूद्रायाम् उत्पन्नो वृषलः।

मैवम् - मा + एवम्। योग्योऽहम् - योग्यः + अहम्।

शस्त्रग्रहणमन्तरेण- शस्त्रग्रहणम् + अन्तरेण।

अन्तरेण- विना। जीवितं- जीवनं।

नन्दस्नेहगुणाः- नन्दानां स्नेहस्य गुणाः (मम) हृदयं अन्तरं स्पृशन्ति- समावर्जयन्ति (अपरश्च) तद्विद्विषां - तेषां नन्दानां विद्विषां शत्रूणां भृत्यः- सेवकः (जातः) अस्मि, ये- नन्दरूपाः



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**विस्तरांशः**

द्रुमाः- वृक्षाः स्वयं सिक्ताः- परिपालिताः सन्तः एव । मित्रशरीररक्षणकृते- मित्रस्य- सुहृदः चन्दनदासस्य यत् शरीररक्षणं - देहगुप्तिः तस्य कृते मया शस्त्रम् आयुधं - (मन्त्रित्वं) व्यापारणीयं- स्वीकरणीयम् (अन्यथा तस्य मुक्तिर्नास्ति) कार्याणां- प्राक्तनकर्मणां गतयः- परिणतयः चिरात् विधेः- विधातुः अपि आज्ञाकारत्वं न यान्ति।

सर्वकार्यप्रतिपत्तिहेतवे- सर्वेषां कार्याणां प्रतिपत्तिः- स्वीकृतिः तस्याः हेतवे- कारणाय। आर्यप्रसादः- आर्यस्य- पूज्यस्य भवतः प्रसादः - अनुग्रहः। संयमितकरचरणाः - संयमितं बद्धं करचरणम्- हस्तपादं यस्य सः। प्रहारभूमिम्- द्वारदेशम्। अस्मद्वचनादुच्यन्ताम् इति - अमात्यराक्षसस्य वचनानुसारं चन्द्रगुप्तः मलयकेतवे पित्र्यं राज्यं प्रददाति। अतः भवन्तः (भद्रभटादयः) मलयकेतुना सह गच्छन्तु। यदा सः सिंहासने अधिष्ठितः भवति तदा भवद्भिः पुनरागन्तव्यम्।

विषयं- राज्यम्। नेतरि- अमात्ये सति।

नन्दं प्रति इदानीमपि मम हृदये स्नेहादरः। किन्तु अहं शत्रूणां भृत्यः संजातः। सुहृद्संरक्षणमिदानीमावश्यकम्। कर्मणः गतिः विधात्रा अपि रोद्धुं न शक्यते।

**गद्यक्रमः**

वाहनहस्तिभ्यां सह सर्वबन्धनं मुच्यताम्। पूर्णप्रतिज्ञेन मया केवलं शिखा बध्यते।

**विस्तरांशः**

वाहनहस्तिभ्यां वाहनः अश्वः हस्तिभिः गजैश्च सह सर्वबन्धनं सर्वेषां बन्धनं- संयमनं मुच्यताम्- अपनीयताम्। पूर्णप्रतिज्ञेन - पूर्णा सफला प्रतिज्ञा- प्रतिश्रुतिः यस्य तादृशेन मया केवलं शिखा बध्यते। सह योगे तृतीया।

शिखा - मस्तकमध्यकेशपुञ्जः।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**विस्तरांशः**

अश्वगजादिभ्यां सह सर्वानपि बन्धनस्थितान् विपक्षजनान् मोचयत। मम प्रतिज्ञा पालिता। अतः केवलं शिखा मया बध्यते। सर्वासूत्रकः चाणक्यः राज्यैश्वयाणि सर्वाणि अनुभोक्तुं समर्थोऽपि सर्वं त्यक्त्वा स्वप्रतिज्ञानिर्वर्तितचरितार्थतया शिखां बध्वा गच्छति इति तात्पर्यः।

सह वाहनहस्तिभ्यां - सह योगे तृतीया।

**गद्यक्रमः**

राक्षसेन समं मैत्री वयं च राज्ये आरोपिताः । सर्वे च नन्दाः उन्मूलिताः। अतः परं किं प्रियं कर्तव्यम्?

**विस्तरांशः**

राक्षसेन समं - सह मैत्री- सख्यम् (जातम्) वयं च राज्ये आरोपिताः स्थिरीकृताः। सर्वे च नन्दाः उन्मूलिताः नाशिताः अतः अस्मात्परं किं प्रियं कर्तव्यम्- करणीयम्।

व्या.वि राक्षसेन समं - समम् इत्यस्य प्रयोगे तृतीया विभक्तिः।

### चाणक्यनीतिसूत्राणि

पूर्वं निश्चित्य पश्चात्कार्यमारभेत ।

कार्यान्तरे दीर्घसूत्रता न कर्तव्या न चलच्चित्रस्य कार्यावाप्तिः।

दोषवर्जितानि कार्याणि दुर्लभानि।

दुरनुबन्धं कार्यं नारभेत।

कालवित् कार्यं साधयेत्।

देशकालविभागौ ज्ञात्वा कार्यमारभेत।

यो यस्मिन् कर्मणि कुशलः स तस्मिन्नेव योजयेत्।

स्वशक्तिं ज्ञात्वा कार्यमारभेत।

मन्त्रमूलाः सर्वारंभाः।

मन्त्रसंवरणे कार्यसिद्धिः भवति।

मन्त्रनिस्त्रावः सर्वं विनाशयति।

कार्याकार्यप्रदीपो मन्त्रः।



Downloaded from https:// www.studiestoday.com


Downloaded from https:// www.studiestoday.com



## मुद्राराक्षसनाटककथासारः

अन्नसत्रात् कुसुमपुरराज्याधिपतिना नन्दराजेन निष्कासितः विष्णुगुप्तः चन्द्रगुप्तमुपयुज्य नन्दवंशमुन्मूलयितुं बद्धश्रद्धोऽभवत्। नन्दराजः चन्द्रगुप्तस्य पितरम् एकोनशतं भ्रातॄन् च कारागृहे बद्ध्वा अन्नोदकान्यदत्वा जघान। अतः तान् प्रति चन्द्रगुप्तः प्रतिकारेच्छुरभवत्।

एकदा चन्द्रगुप्तः मार्गस्थितं पादौ कृतक्षतं कुशं भस्मसात्कृत्य तल्लीनं जलं पिबन्तम् अतिप्रकोपनं कञ्चन विप्रं ददर्श। विष्णुगुप्तमधिकृत्य तस्य विप्रस्य पितुः शिवगुप्तस्य मरणकारणं पादे कुशेघातः आसीदित्यपि एतत्कृतस्य कारणम्। ज्ञात्वा सर्वमेतत् उन्मूलनाशकः एषः मम सहायी भवेच्चेत् कार्यं क्षिप्रसाध्यमिति चन्द्रगुप्तः अचिन्तयत्। यदि सः मम मित्रं भवेत्तर्हि मम मनोरथः सफलं भवेत् इति नन्दैः अवमानितं विष्णुगुप्तं चन्द्रगुप्तः स्नेहेन विश्वासेन आदरेण च स्ववशगमकरोत्। विष्णुगुप्तः चन्द्रगुप्तस्यमित्रं भूत्वा नन्दैः अज्ञात्वा गूढतन्त्रेण नन्दोपद्रवमकरोत्। एकदा चाणक्यस्य मन्त्रकृत् भृत्यः निपुणकः यदृच्छया नन्दवंशामात्यस्य राक्षसस्य मुद्राङ्गुलीयकं राक्षससुहृदः वणिक्छ्रेष्ठस्य चन्दनदासस्य देहलीतः प्राप्तवान्। चाणक्यः राक्षसस्यापरं सुहृदं शकटदासं बलात्प्रेरयन् सङ्केतसूचनां मुद्राङ्कनं च विनैकं सन्देशमालेखयत् । किञ्च लेखनं राक्षसाङ्कुलीयकेन मुद्रणं कृत्वा पश्चात् स्वकाव्यनिवृत्यै यथोचितं उपायोजयन्। चन्द्रगुप्तवधाय उत्सुकस्य राक्षसस्य प्रयत्नं विफलीकृत्य नन्दराजं हन्तुं विष्णुगुप्तेन कृतः यत्नः सफलमभूत्। विष्णुगुप्तेन आसूत्रितेन विषकन्याप्रयोगेण राक्षसपर्वतराजयोः संख्यं पराजितमभूत्। चन्द्रगुप्तम् उपरोद्धुं प्राप्तान् पौरमुख्यान्





Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



चाणक्यः तन्त्रेण चन्द्रगुप्तस्य आत्ममित्राणि अकारयत्।

विष्णुगुप्तः उपायजालैः कुटिलतन्त्रेण नन्दान् विनाश्य चन्द्रगुप्तं राज्यं समर्पितवान्। चन्द्रगुप्तस्य अमात्यरूपेण स्थितः विष्णुगुप्तः पुनः शत्रुत्वे वर्तमानम् अमात्यराक्षसं वशीकर्तुम् एकं तन्त्रं प्रयुक्तवान्। यदि अमात्यराक्षसमित्रस्य चन्दनदासस्य गृहे गूढतया स्थितान् राक्षसपुत्रकलत्रादीन् स्ववशे गृह्णीयात् तर्हि राक्षसः अवश्यं वशे भवेदेव इत्यालोच्य तं चन्दनदासं राक्षसस्य भार्यापुत्राश्चानुपदमेवेतःप्रेषणीयाः इति तमाज्ञापयामास। चन्दनदासस्तु प्राणान् वाऽपि परित्यजेयम् न तु मित्रद्रोहेण तदीयपत्नीपुत्रादिकं गृहाद्बहिः प्रेषयेयम् इत्यब्रवीत्। तामिमां वाचं श्रुत्वा राजाज्ञोल्लङ्घिनः वधार्हाः भवेयुः इत्युद्घोष्य, तं वध्यस्थानम् अनयत्।

राक्षसः आत्ममित्ररक्षणाय सर्वमपि त्यक्तुं निश्चितमनाः स्वयमेव कौटिल्यसमीपं गतः स्वाभीष्टं चन्दनदासविमोचनं प्रार्थयामास। चाणक्यः तादृशमेकं सन्धिं निरीक्ष्यमाणः आसीत्। सः अमात्यन्तराक्षसम् अनितरसाधारणैः परिपूर्णः भवान् सर्वं भूतं भव्यं धर्ममधर्मं कार्यमकार्यं च समालोच्य निर्धारयितुं समर्थः इति मुक्तकण्ठं श्लाघितवान् । चाणक्यः चन्दनदासं मलयकेतुं च बन्धनात् विमुच्य अमात्यराक्षसं चन्द्रगुप्तस्य मन्त्रिपदे नियुक्तवान्। प्रतिज्ञां पूर्णतया निर्वृत्य स्वशिखायाः बन्धनं च कृत्वा विष्णुगुप्तः सर्वान् त्यक्त्वा सर्वबन्धनात् आत्मानं विमुच्य एकान्ते कस्मिंश्चिद्देशे तापसधर्ममनुसरन्नवर्तत।

## चाक्रिकारोहणप्रक्रिया

विष्णुगुप्तस्य प्रबन्धनैपुण्यान्यधिकृत्य कक्ष्यायां चर्चां चालयतु।

चर्चासूचिका:

१. आसूत्रणम् आविष्करणं च।
२. अवसराणां सदुपयोगः।
३. मानवशेषीणां सदुपयोगः।
४. प्रतिबन्धानां दूरीकरणम्।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com





# कुशलिनः सन्तु सर्वदा।

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।।

ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते।
सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते।।

क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।
स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



देवान् भावयतानेन ते देवा भावयन्तु वः।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ।।

उद्धरेदात्मनाऽत्मानं नाऽऽत्मानमवसादयेत्।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः।।

## भगवद्गीता

भारतीयदर्शनपद्धतिषु प्रमुखं स्थानमावहति श्रीमद् भगवद्गीता। ग्रन्थोऽयं व्यासविरचितस्य महाभारतस्य भीष्मपर्वणि विद्यते। वेदान्तदर्शने विद्यमानेषु प्रस्थानत्रयेष्वन्यतमा भवति। अष्टादशाध्यायेषु सप्तशताधिकैः श्लोकैः गीता अर्जुनाय उपदिश्यते। कुरुक्षेत्रयुद्धमुखे अर्जुनेन सुहृद्बान्धवाः अभिमुखीकृताः। सन्दर्भेऽस्मिन् युद्धनिपुणोऽपि सः दुर्बलचित्तः युद्धविमुखश्चाभवत्। तदा कृष्णः कर्मविमुखम् अर्जुनं कर्मोन्मुखताम् अनयत्।

## पठनप्रवर्तनानि

१. पठितपूर्वाणां समानाशययुक्तानां श्लोकानां पट्टिकां करोतु।
२. श्लोकानां गद्यक्रमं लिखतु।
३. श्लोकस्य आशयम् उपयोक्तुम् समर्थान् अनुभूतपूर्वान् कांश्चन जीवितसन्दर्भान् लिखतु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## व्याख्या

पदच्छेदः

सङ्गस्तेषूपजायते - सङ्गः+ तेषु +उपजायते
नैतत्वय्युपपद्यते - न +एतत् + त्वयि +उपपद्यते।
त्यक्त्वोत्तिष्ठ - त्यक्त्वा+ उत्तिष्ठ
कामात्क्रोधोऽभिजायते - कामात् +क्रोधः+ अभिजायते
उद्धरेदात्मनात्मानम् -उद्धरेत् + आत्मना +आत्मानम
आत्मैव - आत्मा +एव
ह्यात्मनः - हि +आत्मनः

श्लोकः १

***क्लैब्यं मा स्म गमः पार्थ...। (२/०३)***

हे पार्थ! क्लैब्यम् मा स्म गमः, त्वयि एतत् न उपपद्यते। हे परन्तप! क्षुद्रं हृदयदौर्बल्यं त्यक्त्वा उत्तिष्ठ।

गद्यक्रमः

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| हे पार्थ | - | हे अर्जुन! |
| क्लैब्यं मा स्म गमः | - | न कदाचित् षण्डत्वम् अगच्छः। |
| एतत् त्वयि | - | एतत् नपुंसकत्वं भवादृशे धीरे |
| न उपपद्यते | - | कदाचित् न युज्यते। |
| हे परन्तप! | - | हे शत्रुनाशक! |
| क्षुद्रं हृदयदौर्बल्यं | - | हीनां हृदयदुर्बलतां |
| त्यक्त्वा उत्तिष्ठ | - | उपेक्ष्य युद्धाय सन्नद्धो भव। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**आपन्निवारणम्** (Crisis Management)

प्रगतिपथे चरतां जनानां संस्थानाञ्च विविधापदः समायान्त्येव। विजयरोधिकाः ताः आपदः ज्ञेयाः तरणीयाश्च। सैव प्रक्रिया भवति आपन्निवारणम्। काश्चन घटनाः अत्र निर्दिष्टाः । प्रकृतिक्षोभः, आतङ्कवादः, साङ्केतिकविघ्नाः, युद्धाः, अपघाताः।

**भावार्थः**

अयं निजः परः इत्यादि भेदचिन्ता खलु हृदयदौर्बल्यहेतुः। धीराः पुरुषाः कदापि दुर्बलचित्ताः भूत्वा न षण्डाः भवेयुः। प्रतिकूलावस्थास्वपि मनसा वाचा कर्मणा ते कर्मोत्सुकाः स्युः। अपि च प्रगतिपथे विद्यमानाः आपदः धीरतया तरणीयाः एव।

**श्लोकः २** *धायतो विषयान् पुंसः...। (२/६२)*

**गद्यक्रमः**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| विषयान् | - | शब्दादीन् इन्द्रियविषयान् |
| ध्यायतः पुंसः | - | सदा चिन्तयतः पुरुषस्य |
| तेषु | - | शब्दादिविषयसुखेषु |
| सङ्ग उपजायते | - | आसक्तिः जायते। |
| सङ्गात् | - | विषयासक्तेः |
| कामः | - | अतिलोभः |
| सञ्जायते | - | उपजायते |
| कामात् क्रोधः | - | अतिलोभात् कोपः |
| अभिजायते | - | उत्पद्यते। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



श्लोकः ३

*क्रोधाद् भवति सम्मोहो...। (२.६३)*

गद्यक्रमः

| अन्वयः | | अर्थः |
|---|---|---|
| क्रोधात् | - | कोपात् |
| सम्मोहः भवति | - | मूढता भवति |
| सम्मोहात् | - | मूढतायाः |
| स्मृतिविभ्रमः | - | शास्त्रोपलब्धसंस्कारनाशः |
| स्मृतिभ्रंशात् | - | संस्कारनाशात् |
| बुद्धिनाशः | - | कार्याकार्यविवेकनाशः |
| बुद्धिनाशात् | - | विवेकनाशात् |
| प्रणश्यति | - | सर्वनाशः भवति। |

भावार्थः

शब्दस्पर्शरूपरसगन्धाः इन्द्रियविषयाः भवन्ति। विषयसुखेष्वासक्तः कामक्रोधमदमात्सर्यादिभिः स्वास्थ्यराहित्यं अनभवति। तद्वारा विवेकशून्यता संस्कारनाशश्च भवेत्। तत्तु न केवलं आत्मनः परन्तु समाजस्य तथा लोकक्रमस्य च सर्वनाशाय कल्प्यते।

**आयासनिवारणम्** (stress management)

प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते इत्युक्त्या शारीरिकी मानसिकी च प्रसन्नता एव स्वस्थता इत्यभिहिता। सैव आयासराहित्यमित्युच्यते। तथा पञ्चज्ञानकर्मेन्द्रियाणां संयमः आयासनिवारणे मुख्यं भवति। आयासनिवारणाय केचनोपायाः निर्दिष्टाः। आसनानि ।प्राणायामः। ध्यानयोगः। उत्प्रेरणम्। दिनचर्या।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**श्लोकः ४** *देवान् भावयतानेन...। (३/११)*

**गद्यक्रमः**

| अन्वयः | | अर्थः |
|---|---|---|
| देवान् | - | इन्द्रादिदेवान् |
| अनेन भावयत | - | यज्ञकर्मणा तोषयत। |
| बन्धुरात्मैव | - | बन्धुः+ आत्मा +एव |
| ते देवाः | - | ते इन्द्रादिदेवाः |
| वः भावयन्तु | - | युष्मादृशान् तोषयन्तु च। |
| परस्परं | - | अन्योन्यम् |
| भावयन्तः (सन्तः) | - | तोषयन्तः सन्तः)। |
| परं श्रेयः | - | ऐश्वर्यकोटिं। |
| अवाप्स्यथ | - | प्राप्नुयत। |

**विभवविनिमयः** (Resource Management)

व्यक्तेः संस्थायाश्च कर्माणि प्रगतिमुपलक्ष्य वर्तन्ते। तत्र भौतिकानाम् आध्यात्मिकानां च विभवानां सदुपयोगः कार्यः। एवं प्रगतये विभवविशेषाणां संविनियोगः भवति विभवविनिमयः। केचन विभवविनिमयोपायाः प्रतिपाद्यन्ते।
आर्थिकसम्पद्विनिमयः। साङ्केतिकज्ञानविनिमयः।
मानवशेषीविनिमयः। असंस्कृतद्रव्यविनिमयः।

**भावार्थः**

भौतिकान् आत्मनिष्ठान् च विभवानुपयुज्य यज्ञकर्मणा देवान् तोषयन्तु। एवं तुष्यन्तः देवाः वर्षादिभिः प्रकृतिविभवैः मानवान् च तोषयन्ति। एवं परस्परसम्पद्विनिमयेन मिथः श्रेयसः परमाम् अवस्थां प्राप्नुवन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| दकारान्तः त्रिषु लिङ्गेषु समानः 'युष्मद्' शब्दः | | | |
|---|---|---|---|
| *विभक्तिः* | *एकवचनम्* | *द्विवचनम्* | *बहुवचनम्* |
| *प्रथमा* | त्वम् | युवाम् | यूयम् |
| *द्वितीया* | त्वाम् / त्वा | युवाम् / वाम् | युष्मान् / वः |
| *तृतीया* | त्वया | युवाभ्याम् | युष्माभिः |
| *चतुर्थी* | तुभ्यम् / ते | युवाभ्यां / वाम् | युष्मभ्यं / वः |
| *पञ्चमी* | त्वत् | युवाभ्याम् | युष्मत् |
| *षष्ठी* | तव / ते | युवयोः / वाम् | युष्माकम् / वः |
| *सप्तमी* | त्वयि | युवयोः | युष्मासु |

**श्लोकः ५**

*उद्धरेदात्मनात्मानं...। (६/५)*

**गद्यक्रमः**

| **अन्वयः** | | **अर्थः** |
|---|---|---|
| आत्मना | - | विवेकज्ञानयुक्तया बुद्ध्या |
| आत्मानं | - | संसारसागरे निमग्नं निजं |
| उद्धरेत् | - | योगारूढावस्थां नयेत् |
| आत्मानं | - | निजं |
| न अवसादयेत् | - | न विषण्णतां प्रति नयेत् |
| आत्मनः बन्धुः | - | विषयेष्वासक्तस्य स्वस्य बन्धुः |
| आत्मा एव | - | विवेकज्ञानयुक्ता बुद्धिः एव |
| आत्मनः रिपुः | - | विषयासक्तस्य स्वस्य शत्रुः |
| आत्मा एव | - | संसारसागरे मग्नः स्वस्य मनः एव। |



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



**व्यक्तिगतविकासः** (Personal Management)
प्रतिभावन्तो भवन्ति जनाः। प्रतिभानां प्रत्यभिज्ञानं परिपोषणं तथा समाजप्रगत्यै तासां सदुपयोगश्च व्यक्तिगतविकासे प्राधान्येन स्वीक्रियते। व्यक्तिगतविकासाय केचन उपायाः प्रतिपाद्यन्ते। स्वतन्त्रं प्रतिभापरिज्ञानम्। तस्य क्रमिकः विकासः। साङ्केतिकविद्यायाः आयोजनम्। समाजे संप्रयोगः।

**भावार्थः**

विवेकज्ञानयुक्ता बुद्धिः स्वस्य बन्धुः, विषयेष्वासक्तं मनः स्वस्य शत्रुः च। विवेकबुद्ध्या विषयनिमग्नं मनः नियम्य उत्कर्षतां प्राप्नुयात्, न तु अपकर्षताम् । अतः उत्तमव्यक्तित्वविकासाय स्वकीयां प्रतिभां प्रत्यभिज्ञाय पोषणीया।

## चाक्रिकारोहणप्रक्रिया


प्रबन्धननैपुण्यानि प्रवर्धयितुम् अनुष्ठेयानाम् उपायानां पट्टिकां करोतु

१. एकाग्रता।
२. इन्द्रियसंयमनम्।
३. ............ ।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com





# मन एव बलीयत्।

**भारतीयदर्शनेषु योगशास्त्रस्य मुख्यं स्थानमस्ति। पतञ्जलिमहर्षिणा प्रणितमिदं शास्त्रं मनसः विमलीकरणाय उपायं निर्दिशति। मनसः विमलीकरणेन मनोनियन्त्रणं तद्वारा व्यक्तेः विकासश्च साध्यं भवति।**

**'योगश्चित्तवृत्तिनिरोधः' इति पातञ्जलयोगसूत्रे योगलक्षणं निरूपितम्। मन एव जगत्सर्वम्, मन एव मनुष्याणां कारणं बन्धमोक्षयोः इत्यादिभिः उक्तिभिः मनसः प्राधान्यं सम्यगुक्तम्। कर्मकौशलं मनसः स्थैर्यं सुस्थितिं चाश्रित्य तिष्ठति। अत एव जीवितविजयार्थं मनोनियन्त्रणम् अनिवार्यम्**

**उद्विग्नता (Stress)**

उद्विग्नता अथवा आयासः अधुनातनजीवने एका प्रधानसमस्या भवति। जनाः यदा कदाचित् येन केनापि कारणेन उद्विग्नतायाः पात्राणि भवन्ति। मानसिकोद्वेगः बहुविधानां रोगाणामपि कारणं भवति। एतदस्माकं कर्मकुशलतां बाधते इत्यतः उद्विग्नताम् उपशमयितुम् उपायाः चिन्तनीयाः। बहुविधाः योगचर्याः अस्मिन् विषये आचार्यैः निर्दिष्टाः भवन्ति।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## योगदर्शनम्

भारतीयेषु षट्सु आस्तिकदर्शनेषु अन्यतमं भवति योगदर्शनम्। पातञ्जलयोगसूत्राणि अस्य शास्त्रस्य आधारभूतानि भवन्ति। १९५ सुत्रैः योगदर्शनम् आख्यातं पतञ्जलिना। अथ योगानुशासनम् इत्यारभ्य पुरुषार्थशून्यानां गुणानां प्रतिप्रसवः कैवल्यं स्वरूपप्रतिष्ठा वा चितिशक्तिरिति इति पर्यन्तं सूत्राणि चतुर्भिः अध्यायैः विभक्तानि। समाधिपादः, साधनपादः, विभूतिपादः, कैवल्यपादः इति क्रमशः अध्यायानां नामानि। योगः कश्चन जीवितचर्या भवति। अष्टविधयोगचर्यया कैवल्यमिति योगिनां मतम्। युज् समाधौ इति धातोः योगशब्दः निष्पन्नः। अतः योगः इत्यस्य योजनं संयोगः इत्याद्यर्थाः। आत्ममनश्शरीरप्रकृतिनाम् एकीभाव एव अनेन विवक्षितं भवति।

**इति योगाचार्याः वदन्ति। तदर्थं यम- नियम- आसन- प्राणायाम- प्रत्याहार- धारणा- ध्यान- समाधिरिति अष्टाङ्गानि अपि पतञ्जलिमहर्षिणा निर्दिष्टानि।**

**योगानुशीलनेन शरीरस्य इन्द्रियाणां मनसः च प्रवर्तनक्षमता अभिवर्धते कर्मक्षेत्रे अनायासतां लभते च। आत्मविमर्शनं स्वशक्तिप्रभावादीन् अधिकृत्य प्रत्यभिज्ञानं चोपलभते। लाभालाभौ, जयाजयौ सुखदुःखे इत्यादिषु द्वन्द्वेषु समबुद्धिः जायते। किमधिकम् उपबोधमनसि परिवर्तनमपि योगेन साध्यम्।**

**अपि च इन्द्रियसंयमनमपि साध्यते। आदर्शव्यक्तित्वाय आवश्यकाः गुणाः इन्द्रियसंयमनेनैव लभन्ते।**

**एवं जीवितनैपुण्यानि समार्जयितुं, क्षमताः वर्धयितुं तथा च एकाग्रतां शुद्धबोधावस्थां च प्राप्तुं सहायकं भवति योगशास्त्रम्।**



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



### अष्टाङ्गयोगः

यमः - अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहाः।

नियमः - शौचसन्तोषतपः स्वाध्यायेश्वरप्रणिधानानि नियमाः।

आसनम् - करचरणादिसंस्थाविशेषम्।

यथा - पद्मासनं स्वस्तिकाख्यं
भद्रं भद्रासनं तथा।
वीरासनमितिप्रोक्तं
क्रमादासनपञ्चकम्।।

प्राणायामः - कनिष्ठानामिकाङ्गुष्ठैर्यन्नासापुटधारणम्।
प्राणायामः स विज्ञेयः तर्जनीमध्यमे विना।।

प्रत्याहारः - स्वविषयसम्प्रयोगाभावे चित्तस्वरूपानुकारः।

धारणा - धारणा मनसो धृतिः
( ध्येये चित्तस्य स्थिरवन्धनम्)

ध्यानम् - ध्येये सक्तं मनो यस्य ध्येयमेवानुपश्यति।
नान्यं पदार्थं जानाति ध्यानमेतत्प्रकीर्तितम्।

समाधिः - ध्येयमेव हि सर्वत्र ध्याता तल्लयतां गतः।
पश्यति द्वैतरहितं समाधिः सोऽभिधीयते।।

### पठनप्रवर्तनानि

१. चर्चां कृत्वा योगाभ्यासमधिकृत्य लघुटिप्पणिं लिखतु।
२. प्रतिदिनजीवितचर्यायां योगस्य प्राधान्यमधिकृत्य श्रेणीचर्चां करोतु।
३. एकाग्रता प्रवर्धनात्मकमेकं लघु योगाभ्यासं कक्ष्यायां करोतु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## व्याख्या

**विस्तरांशः**

प्रणितम् - रचितम्। स्थैर्यम् - स्थिरता।

अनुशीलनेन - अभ्यासेन।

योगश्चित्तवृत्तिनिरोधः - योगः + चित्तवृत्तिनिरोधः।

समाधिरिति - समाधिः + इति।

चोपलभते - च + उपलभते

अधिकृत्य - अधि + कृ + ल्यप्।

### केचन वैयक्तिकगुणाः

आत्मनियन्त्रणम्,एकाग्रता, आयासनिवारणम्, भयराहित्यम्, मनस्सान्निध्यम्, आत्मविश्वासः, मूल्याधिष्ठितबोधः, सेवनतत्परता, परदुःखेष्वार्द्रमनोभावः, प्रतिपक्षादरः, समत्वबोधः, क्षमा, वश्यता, सहिष्णुता, स्थिरोत्साहः, निःस्वार्थता, इतिकर्तव्यता च।

### उद्वेगताशमनाय एकः उपायः

समीचीने स्थाने ऋजुशरीरिणो भूत्वा नेत्रे निमील्य उपविशन्तु। पादाङ्गुष्ठात् प्रभृति शिरः पर्यन्ताणि सर्वाण्यङ्गानि यथाक्रमं शिथिलीकुर्वन्तु। श्वासोच्छ्वासप्रक्रियायां वायोः गतिविगतौ श्रद्धधानाः भवन्तु।

ततः परं श्वसनवेलायाम् उरसः संकोचविकासावस्थां स्वयं निरीक्षन्ताम्। एवमेव उदरस्यापि ईदृशीम् अवस्थाम् अवलोकयन्तु। श्वासोच्छ्वासप्रक्रियायां नासिकायाम् अनुभूयमाने शीतोष्णे पृथक् विदन्तु। सर्वथा समाश्वासम् अनुभूय मन्दं मन्दं नेत्रे उन्मीलयन्तु।



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com





## आदर्शप्रश्नाः

१. स्पृशति मां भृत्यभावेन कौटिल्यशिष्यः - अत्र कौटिल्यशिष्यः कः? (चाणक्यः, चन्द्रगुप्तः, राक्षसः)

२. वृषल - इति चाणक्यः कं सम्बोधयति? (चन्द्रगुप्तं, विष्णुगुप्तं, राक्षसम्)

३. दासीकृत्य मामिदानीं विज्ञापनाय मुखरीकरोति कौटिल्यः - कस्य वचनमिदम्?
(चाणक्यस्य, चन्द्रगुप्तस्य, राक्षसस्य)

४. योगश्चित्तवृत्तिनिरोधः इति योगलक्षणं केन निरूपितम्?
(व्यासेन, पतञ्जलिना, विशाखदत्तेन)

५. मनोनियन्त्रणार्थम् अष्टाङ्गानि निर्दिष्टानि - कुत्र?
(भगवद्गीतायां, मुद्राराक्षसे, योगसूत्रे)

६. उदाहरणानुसारं विश्लेषयत। उदा - कोऽत्र - कः + अत्र।

क. सोऽयम् - ........ + ....... । ख. योग्योऽहम् - ........ + .......।

७. आपन्निवारणविषयप्रतिपादकं श्लोकं चित्वा लिखत।

क. ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते।
सङ्गात्संजायते कामः कामात् क्रोधोऽपि जायते।।

ख. क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप।।

८. आयासनिवारणविषयप्रतिपादकं श्लोकं चित्वा लिखत।

क. क्रोधात् भवति सम्मोहः सम्मोहात् स्मृतिविभ्रमः।
स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात्प्रणश्यति।।

ख. उद्धरेदेत्मानाऽत्मानं नाऽऽत्मानमवसादयेत।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः।।

९. चाणक्यस्य राष्ट्रसन्त्रज्ञतां पाठभागानुसारं विशदयत।
( सूचिकाः - अमात्यराक्षसस्य पक्षपरिवर्तनम्, राजाभिषेकम्, नन्दवंशस्योन्मूलनम्, प्रजानां मनःपरिवर्तनम्, चाणक्यस्य कर्मकुसलता, राज्यतन्त्रज्ञता)



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



## एककानुसारीणि पठनप्रवर्तनानि

१. अद्यतनभरणनिर्वहणे चाणक्यसूत्राणां प्रसक्तिः प्रायोगिकतां च चर्चित्वा सोदाहरणं टिप्पणीं लिखतु।

२. आदर्शविद्यार्थिगुणान् समार्जयितुमावश्यकानि प्रायोगिकतन्त्राणि विविच्य लिखतु।


३. व्यक्तेः समाजस्य राष्ट्रस्य च सुस्थित्यर्थं मानवैः अनुष्ठेयानि कार्याणि सञ्चिनोतु।

४. आर्द्रता, मानविकता, चारुता चाश्रित्य निपुणतासम्पादनकार्ये चर्चां कृत्वा टिप्पणिं लिखतु। (निर्दिष्टाभ्यासः)

## अभिसमीक्षा



- http://www.sanskritebooks.org/2009/06/mudrarakshasa- of-visakhadatta-sanskrit-drama-mith-englishtransilation



- Srimathbhagavathgita/Prof.G.Balakrishnan nair/Bhasha Institute
- Timeless Leadership/Devashischatterjee/willeyIndia Edition
- Pathanjalayogasootram/Chowkhambha, Varanasi
- Hatayogapradipika



Downloaded from https:// www.studiestoday.com

Downloaded from https:// www.studiestoday.com



| स्वयंमूल्यनिर्णयरेखा (छात्राणां कृते) | | | | |
|---|---|---|---|---|
| क्रम. सं | पठनप्रवर्तनानि | भागिकतया/ पूर्णतया कृतम् | कस्य साहाय्येन पूर्णं कृतम् | विशदांशः |
| १ | पाठस्य वाचनमालपनञ्च कृतम्। | | १/२/३/४ | |
| २ | संश्लिष्टपदानि विश्लेषितानि। | | १/२/३/४ | |
| ३ | टिप्पण्यः लिखिताः। | | १/२/३/४ | |
| ४ | प्रबन्धनतन्त्राणि क्रोडीकृतानि। | | १/२/३/४ | |
| ५ | उत्तमव्यक्तिगुणाः वर्गीकृताः। | | १/२/३/४ | |
| ६ | नैपुण्योपायाः क्रोडीकृताः। | | १/२/३/४ | |

कस्य साहाय्येन पूर्णं कृतम् -१. अध्यापकस्य, २. सहपाठिनः, ३. पुस्तकस्य, ४. अन्यस्य।

**क्रोडीकरणप्रक्रिया**

[redacted]



Downloaded from https:// www.studiestoday.com